# The Brāhmī

International Multidisciplinary Research Journal

(Peer Reviewed, Referred & Open Access Journal)

Jun-Aug 2024

Volume: 01, Issue:02

**Editor in Chief**

**Prof. Subash Chandra Dash**

# The Brāhmī

International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)

**Jun-Aug 2024**

**Volume: 01, Issue:02**

**Editor in Chief**

**Prof. Subash Chandra Dash**

**Publisher**

**Satya Dash Publishing House**

**Bhubaneswar, Odisha, India**

**Website: https://thebrahmi.com**

# Editorial

## "The Brāhmī": International Multidisciplinary Research Journal

(Jun-Aug 2024, Volume: 01, Issue: 02)

It is with great pleasure that we present the second issue of The Brāhmī: International Multidisciplinary Research Journal, an endeavor that continues to strive toward the highest standards of scholarly excellence. As we move forward with this nascent publication, it is important to reflect on the evolving landscape of academic inquiry and the role our journal plays in fostering a vibrant, interconnected scholarly community.

The world of research is witnessing a paradigm shift—an increasing recognition of the value of interdisciplinarity. The complex challenges faced by societies across the globe demand solutions that draw from diverse fields of knowledge. It is no longer sufficient to confine research within the rigid boundaries of a single discipline. The convergence of ideas from multiple domains not only enriches the understanding of specific issues but also drives innovation and creativity in ways that traditional approaches cannot.

This issue of The Brāhmī embodies the spirit of interdisciplinary research. The contributions featured in this volume traverse a wide range of subjects, from the ancient wisdom of the Vedas to cutting-edge developments in artificial intelligence. Each article, while rooted in its respective discipline, offers insights that resonate beyond its immediate scope, contributing to a broader conversation about the interconnectedness of knowledge.

We are particularly proud to highlight the diversity of perspectives presented in this issue. The articles explore themes as varied as the linguistic intricacies of Sanskrit, the philosophical underpinnings of modern ethical dilemmas, and the socio-cultural dynamics of contemporary global challenges. This diversity is a testament to the journal’s commitment to inclusivity and its role as a platform for voices from different academic backgrounds and geographical regions.

In this era of rapid technological advancement, the preservation and promotion of traditional knowledge systems, such as those rooted in the Sanskrit tradition, are more important than ever. The integration of these ancient insights with modern scientific thought is not only possible but necessary for a holistic understanding of the human experience. We are proud to include works in this issue that explore these intersections, demonstrating the enduring relevance of classical knowledge in the modern world.

As we look to the future, The Brāhmī remains committed to its mission of advancing multidisciplinary research and fostering intellectual dialogue across boundaries. We invite scholars, researchers, and practitioners from all fields to contribute to this ongoing conversation, sharing their unique perspectives and engaging with the diverse community that our journal seeks to build.

In closing, we extend our heartfelt thanks to the contributors, reviewers, and editorial team whose dedication and expertise have made this issue possible. It is through their collective efforts that The Brāhmī continues to grow and evolve as a beacon of scholarly inquiry.

We hope that the articles presented in this issue will inspire new ideas, spark meaningful discussions, and contribute to the advancement of knowledge in ways that resonate both within and beyond the academic community.

Prof. Subash Chandra Dash
Editor-in-Chief
The Brāhmī: International Multidisciplinary Research Journal

# Contents


| Sl. No | Topic Title | Name of the Author | Page No |
|---|---|---|---|
| 1. | Poetical analysis on Kusabhadramahakavyam of Professor Prafulla Kumar Mishra | Sabita Dash | 01-04 |
| 2. | वैदेशिकाटनमहाकाव्यानुसारं विदेशेषु भारतसंस्कृतेरनुसरणम् | प्रताप कुमार मेहेरः | 05-14 |
| 3. | स्वातन्त्र्योत्तरसंस्कृतसाहित्यं प्रति पण्डितप्रबोधकुमारमिश्रस्य अवदानम् | Laxman Majhi | 15-21 |
| 4. | अनूदितसंस्कृतसाहित्ये आचार्यभागीरथिनन्दमहोदयस्य योगदानम् | पूर्णमासी देवी | 22-26 |
| 5. | Social Conditions as Depicted by some Modern Sanskrit Poets of Odisha | Mamata Pradhan | 27-33 |
| 6. | प्रज्ञादूते जगत्-स्वरूपम् | Snigdha Swarupa Barik | 34-39 |
| 7. | शोणितस्वाक्षरकाव्ये गङ्गावर्णनम् | कल्पना नायक: | 40-45 |
| 8. | स्वातन्त्रोत्तरोत्कलीयसंस्कृतसाहित्ये व्यङ्ग्यसाहित्यकार: डाँ.प्रमोदकुमारनायक: | डा. रमेशकुमारदाश: | 46-52 |
| 9. | संस्कृतेऽनूदितसाहित्यपरम्परा ललितलवङ्गलतेति अनूदितगद्यप्रबन्धश्च | सिलिस्वप्ना साहु | 53-56 |
| 10. | प्रणतिपञ्चाशिकायां भगवच्चेतना | Nakul Kumar Sahoo | 57 - 63 |

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

# Poetical analysis on Kusabhadramahakavyam of Professor Prafulla Kumar Mishra

Sabita Dash
Research Scholar
Utkal University

## Introduction

Literary creativity is the application of creative thought or action to the domain of written expression. Literature is one of the major domains where creativity can be observed and includes poetry, dramas and plays, prose such as fictions and essays. Creative literature is the mirror of the society and it retains the potency to influence and motivate the society in a positive direction. The present research paper "KUSABHADRAMAHAKAVYAM OF PROFESSOR PRAFULLA KUMAR MISHRA" is based on original creative work of Prof. Mishra which is published in 2019. He has to his credit 13 kavyas and a novel in Sanskrit (Published); 3 kavyas in Odia, except his dozens of research work in English, Odia, Hindi and Sanskrit. About one hundred and fifty research papers are published in different languages in Research Journals. He is a famous postmodern poet. Many short stories and plays of his writings in Sanskrit are waiting for publication. At present, he is working as Chancellor of Dr. Rajendra Prasad Central Agricultural University, Bihar.

The present seminar topic "Poetical analysis on Kusabhadramahakavyam of Professor Prafulla Kumar Mishra" is mainly based on the origin and development of the riverine Kusabhadra. Kusabhadra is a holy riverine system, originated from the Mahanadi system. Kuakhai, a distributive system from Kathayodi, is the main distributary river of Mahanadi. Kuakhai was divided into two Kuakhai and Kusabhadra, at the outskirt of Bhubaneswar. The mahakavya is written in simple style. The Mahakavya is composed in simple meters and language. From the point of the literally value besides providing important information regarding the history and geography. The present work deals with a multi-dimensional topic. Lively descriptions of rivers, forests and seas, graphic accounts of historical facts, figures and many other informative and admonishing laws and morals etc. provide this work the status of Mahakavya. The religious tradition, socio-cultural life and natural beauty is described in fifteen cantos.

The first canto starts with Mangalacharana and the introduction of the kavya. Maintaining the tradition of mahakavya, the work begins with a prayer of Lord Jagarnnath: -

प्रणिपत्य जगन्नाथं
सर्वसिद्धिप्रदायकम् ।
शक्तिसरस्वतीदेव्यौ
भूयोभूयो नमाम्यहम्।।१।।

The second canto, namely "कुशभद्रावर्णनम्" describes the Kusabhadra river. Kusabhadra is a holy riverine system, originated from Mahanadi system. Kuakhai, a distributive system from Kathayodi, is the main distributary river of Mahanadi. Kuakhai was divided into two Kuakhai and Kusabhadra, at the out skirts of Bhubhaneswari towards Balianta and Pandara on the other side. Kusabhadra meets the Bay of Bengal at Ramachandi near Chandrabhaga of Konark. On the way, it runs through many villages and holy shrines. Kusabhadra Mahakavya intends to highlight the story and importance of saints and mendicants of the valley. This valley is not only a fertile land of agriculture, but also the land of culture and religious movement.

The third canto "महर्षे: आश्रमवर्णनम्" describes the hermitage of sage Kanva. An ashram is a spiritual hermitage in Indian religions. The residents of an ashram regularly performed spiritual and

physical exercises, such as the various forms of Yoga. Other sacrifices and penances, such as yajnas were also performed. According to Prof. Mishra: -

यमनियमयोगेन
मनुष्यता विवर्द्धते ।
अतः योग्यतमस्तत्र
योगार्थं यतते मुहुः ।। २८ ।।

The Yamas and their complement the Niyamas, represents a series "right living" or ethical rules within Yoga philosophy. Yamas are recommended activities and habits for healthy living, spiritual enlightenment and a liberated state of existanece. The Niyamas are positive duties or observances. Together Yamas and Niyamas are personal obligations to live well.

The fourth canto "मुनीवाक्यम्" intends to describe the speech of the sage. The fifth canto "ऋषे:वाक्यं भद्रां प्रति" is a dialogue between Bhadra, the daughter of the sage and sage himself.

The sixth "बुद्धस्य जन्मादि कथनम्" canto describes on Buddha and his relation with Odisha. Gautam Buddha was a spiritual leader and a founder of Buddhism. According to Kusabhadramahakavyam, Siddhanta was born in Lumbini, his father was Suddhodan and the mother was queen maya. He married to Yasadhara and Rahul was his son. He is said to have lived a sheltered life of luxury that was interrupted when he left the palace and laid foundation of Buddhism. Buddhism was quite prevalent in ancient Kalinga and hence, it has great influence on the earlier known names of Bhubaneswar and its nearby areas. The poet Prof. Mishra has mentioned various localities of Bhubaneswar: -

अपि बुद्धेश्वरी माता
डमणा पाण्डरा (१) तथा
गण्डमुण्डादय:ग्रामा:
प्रसिद्धाः भुवनेश्वरे ।। २८ ।।

Bhubhaneswar is another name of Lord Buddha. The area where Gautam Nagar is located has a Mausima temple and the area opposite to it, is Buddha Nagar. The nearby temple is Buddheswari (a female equivalent of Buddha). The place Barang (Near Nandankanan) evolved from Chudanga (garh), the fortified area made by king chodagangadeva, which itself was previously known as Sarangagarh (due to abundance of waterlilliea around). Damana might be from Maa Damanei, at Kusabhadra river bank. The poet also mentions Kapilespur, Tarapur, Dharmpur, Chakeisiani, Baramunda, Gandamunda and many other areas.

The three cantos 7,8 and 9 are devoted to saint poet Jayadeva who is the poet related to Lord Jagarnnath temple and Kusabhadra river. Sri Jaydev, the celebrated Poet of G itagovinda was born in the village Kenduvilva sasasn. He introduced the cult of Radha and Krishna through his Gitagovinda. He institutionalized the Devadasi system. He married a dancer named Padmavati. Gitagovinda was regularly sung and danced in the temple of Lord Jagarnnath at Puri as part of the Lord's nocturnal liturgy: -

क्व स कवि: कुत: पद्मा
सर्वे कालवशाद् गताः
तथापि गीयते लोक
श्रीजगन्नाथमन्दिरे ।। ३९ ।।

The tenth Canto gives a vivid picture of village Ganeswarpur and a pathetic anecdote of Dasarathi Dasa who was from the head of the village family. The eleventh canto "बालुकन्दलग्रामवर्णनम्" devotes to the description of Balukandala village.

The twelfth canto "बलरामशापकथनम्" speaks of the curse to the poet Balaram Dasa by Goddess Mahalaxmi. The thirteen canto "बलरामस्य समाधि:" describes the way of Yoga-Sadhana and the devotion of Balaram Dasa, one among the most revered Pancasakha of 15th century AD. His notable work is Jagamohan Ramayan or Dandi Ramayan. He became a devotee of Jagarnnath. It is speculated that he dried while on a pilgrimage to Puri in Begonia village near Konark. There is a memorial for him near the village Erabanga: -

धन्यं धन्यं महत्पुण्यं
स्नानमेतद् धरातले ।
भक्तस्य भजमानस्य
लीलाक्षेत्रं निरूपितम्।। २५ ।।

The fourteenth canto "कुशभद्रातीर्थवर्णनम्" describes the tirthas on the banks of the river Kusabhadra. The socio-religious cross current of Kusabhadra has modulated the style of living of the people of the valley. The people of the valley have been nature worshipper. They strongly realise the presence of God, in the agents of nature, river and other waterbodies and believe it to be a sin to dishonour nature by polluting the waterbodies. Both the banks of the river, are rich in temples, Ashrams of saints and saint poets of Odisha.

The fifteenth canto "उत्कलवाणिज्यवृतान्तम्" describes the trades and maritime activities of Odiah and concludes the Mahakavyam. Maritime trade which was responsible for enrichment of Odisha is a significant aspect of the study of the socio-economic history of Odisha. Overseases trade is an important element of the Odisha traditional accounts. On the basis of various evidences, an attempt has been made by Prof. Mishra to describe the trades and maritime activities of Odisha. He has mentioned the celebration of Kartik Purnima, a symbolic custom of the sea voyage. It reiterates the flourishing trade practices that existed once: -

राधादामोदरौ पूज्यौ
कार्त्तिके दीपस्तम्भकम्।
प्लावनात् कदलीनावं
सर्वत्र जलसम्पदि।।२०।।

**Conclusion**

On the whole, it may be concluded that "Kusabhadramahakavyam" is a glorious addition to the rich history of Sanskrit literature composed in Odisha. An observed from the contents of Kusabhadramahakavyam that history and nature forms a subsidiary part of the poem. The description of nature as the part of a classical kavya is not at all neglected. On the other hand, Professor Prafulla Kumar Mishra displays his talent of poetic art, swing of high imagination, control over Sanskrit phraseology and knowledge of Hindu beliefs and traditions. The poetic beauty is internal and spiritual rather than physical. It has all the characters of Mahakavya as per the rhetorician Dandin and Visvanath Kaviraja. This Mahakavya is a sketchy one but needs an elaborate description in future with a suitable translation.

© 2024, The Brāhmī

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

**Referances**

1) Mishra. Prafulla Kumar, Kusabhadramahakavyam, Dhara Shree Radha Trust, 1st Edition, 2019
2) Mishra P.K. Sanskrit Poetics, Bhartiya Vidya Prakasana, New Delhi
3) Panda.Raghunath, Nanda Govinda Ch., Contribution of Orissa to Sanskrit Literature, Prachy Bharati Publications, V. S.S Nagar, BBSR, 1st edition 1994
4) Rath. Banamali, A study on the imitations of Gita Govinda, Kalyani Prakashan, Berhampur, 1st edition 1984
5) M. Monier Williams, Sanskrit English Dictionary, New Delhi 2008
6) https://en.m.wikipedia.org/wiki/Balarama_Dasa
7) https://en.m.wikipedia.org/wiki/Jagannath_Temple,_Puri
8) https://en.m.wikipedia.org/wiki/Gita_Govinda
9) https://www.yumpu.com/en/document/read/7111080/orissa-review-government-of-orissa
10) https://en.m.wikipedia.org/wiki/Kusha_(Ramayana)
11) https://www.academia.edu/1961015/The_Dramatic_Aspects_of_Jayadeva_in_Gitagovinda
12) https://en.m.wikipedia.org/wiki/Kushabhadra_River

© 2024, The Brāhmī

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

# “वैदेशिकाटनमहाकाव्यानुसारं विदेशेषु भारतसंस्कृतेरनुसरणम्”

**प्रताप कुमार मेहेरः**
Lecturer in Sanskrit
Kantabada College, Bhubaneswara

## १.१. शोधसारांशः -

काव्यं हि समाजस्य अमूल्यं रत्नम्। समाजे घटमानानां सर्वविधतत्त्वानां रसपूर्णं वर्णनं काव्ये भवतीति हेतोः काव्यं सर्वजनहृदयं जयति। उच्यते विद्वद्भिः – "साहित्यं समाजस्य दर्पणमिति"। अतः कवयः यदा काव्यसर्जनं कुर्वन्ति तदा समाजस्य स्थितिं विशेषतया स्वकाव्ये अभिवर्णयन्ति। एवमेव कविः हरिदत्तशर्ममहोदयः स्ववैदेशिकाटनमहाकाव्ये समाजतत्त्वं वहुधा वर्णयति। समाजमङ्गलविषये जागरुकः कविः शर्ममहोदयः शान्तेः प्रचारको भूत्वा स्वकाव्ये समाजमुपदिशति। भारतसंस्कृतेः समाजतनन्त्रं प्रति कथं वैदेशिकानामुदारमनोभावः वर्तते इत्यस्मिन् विषये स्वविरचितवैदेशिकाटनमहाकाव्ये स्पष्टं प्रतिपादयति । विदेशेषु संस्कृतस्य भारतीयसंस्कृतेश्च सम्मानं महाकाव्यास्यास्य मुख्यांशः । विज्ञानस्य तथा आधुनिकजीवनस्य विविध व्यवसायोद्योगकलाकौशलादिषु च संस्कृतस्य शरणमेवाभीष्टमार्ग इति सिद्धम् ।

## १.२. वैदेशिकाटनमहाकाव्यानुसारं विदेशे भारतसंस्कृतेः प्रभावः

### १.२.१. धार्मिकविश्वासः

पेरिस-पर्यटनवेलायां कविः लिखति – यद्यपि पेरिसनगरं तावत् अत्याधुनिके परिवेशे पूर्णमासीत् तथापि धार्मिकविश्वासः तथा भारतीयसंस्कृतिं प्रति आभिमुख्यं नितरां दृश्यते । पेरिस्-नगरे वहुत्र विभिन्नधर्मेषु धृतानि पूजावस्तूनि दृष्टानि । अत्याधुनिकजीवनमध्ये भारतीयसंस्कृतिं प्रति तेषां या श्रद्धा सर्वत्रोद्भासिता परिप्रकाशिता चास्ति । अतः कविः लिखति यत् –

दृष्टं महाभारतनाट्यचित्रं
चाङ्ग्लं मया पेरिस-फिल्मगेहे ।
मूर्त्तिगणेशस्य विराजिताऽऽसीद
द्वारे विशाला नगरस्य मध्ये ।।[1]

वैदेशिकावनां धार्मिकविश्वासः कीदृश इति अस्मादेव परिज्ञायते । महाभारतस्य प्रामुख्यं स्वीकृत्य ते तस्य मर्यादापूर्णकथावस्तुनः परिचालनं प्रेक्षालयेष्वऽपि कुर्वन्ति । अपि च भारतीयसंस्कृतेराद्यदेवं श्रीगणेशं मङ्गलसूचकरूपेण स्वीकृत्य द्वारप्रदेशे संस्थापयन्ति ।

ततः थाईदेशस्य राजधानीं बैङ्काक्-नगरं प्रति कविः जगाम । तत्र धार्मिकविश्वासः वहुत्र दृष्टः । प्रदेशस्यास्य 'थाचाङ्-क्षेत्रे' स्थितं १८०० शतके निर्मितं राजप्रसादं ददर्श । यत्र मरकतमयी बुद्धमूर्त्तिरपि विराजिता वर्तते । स्थानेऽस्मिन् रामकीर्त्तेः चित्ररूपवर्णनं सर्वत्र दरीदृश्यते । रामकीर्त्तेः सकलचरितं चित्रितं शोभते । अत्र वाटोपनाम्ना भव्यरूपमपरमेकं मन्दिरं प्रथितमस्ति । मन्दिरेऽस्मिन् परमविपुला एका बुद्धमूर्त्तिः शयाना दृश्यते । वेदमन्त्रः पालिग्रन्थात् पठित इव ज्ञायते । बौद्धधर्मातिरिक्तं हिन्दुधर्मोऽपि प्रचलितोऽस्ति । थाइदेशस्य स्थाने स्थाने शिव-गणपती-ब्रह्म-विष्णवादि देवाः विविधप्रतिमायुक्ताः नैके देवालयेषु पूज्यन्ते । नैकत्र ब्रह्मणाः मन्दिराणि सुचारुतया शोभमानाः सन्तीति कविः कथयति । धूपदीपादिदानैः पूजाकार्यं सततं प्रचलति । दक्षिणभारतीयारपि भारतात् समागत्य पूजाकार्येषु रताः सन्तीति कविः प्रकाश्य सूचयति –

[1]वैदे.म. ५.८०

दृश्यन्तेऽत्र धवलवसना ब्राह्मणाश्चारूवेषाः
पौरोहित्यं नरपतिकुलोऽन्यत्र वा कर्म तेषाम् ।।[2]

धर्ममाश्रित्य नैकविधपर्वाण्यपि परिपाल्यन्ते । वाट्-सुथाटाग्रभूमौ 'हिन्दुसमाज' इति नाम्ना बहुजनमता संस्थैकास्ति । अत्र पार्श्वे भव्यं मन्दिरमेकमस्ति । मन्दिरेऽस्मिन् सीतारामौ – गणपतिशिवौ – मारुति – दुर्गा – लक्ष्मी – नारायण – भैरव – बुद्ध – राधाकृष्णौ आदि देवताः पूज्यन्ते। भजनं कीर्तनं भक्तिगानं सत्सङ्गः प्रवचनविधिश्चात्र चारुतया भवति । वैङ्काकनगरेऽस्मिन् श्रीहरिहरगुरुप्रेरणया एकः गीताश्रमोऽपि प्रस्थापितोऽस्ति । अस्मिन् आश्रमे भगवतः श्रीकृष्णस्य ललितमधुरा मूर्त्तिरेका राजते । अत्र सप्ताहान्ते साधुजनानां पुण्यजातः सङ्गमश्च जायते । यथा कविना प्रमाणीक्रियते –

बैङ्काकेऽस्मिन् नवपथि तथा चास्ति गीताऽऽश्रमोऽयं
पूर्वं यः श्रीहरिहरगुरु – प्रेरणा - लब्धसंस्थः।[3]

पूर्वोत्तरथाईलैण्डेऽपि प्रासादेषु बौद्धभग्नांशाः राजन्ते । नैकत्र रामस्य कीर्त्तिः परिशोभितास्ति । पिङ्गनद्याः सुतीरे 'काम्फाङ्फेटं' नगरमेकमस्ति । यत्र लङ्काशैल्या मूर्त्तिभिः शोभमानं ललितगृहं दृश्यते । अत्र जनेषु धार्मिकविश्वासः वहुलतया अस्तीति सुदृढप्रमाणमुपलभ्यते । अत्र थाईभूमौ रामपुत्रस्य नाम्ना एका नगरी 'लवपुरी' इति विभाति । अपि च 'विष्णुलोकः' नाम्ना लघुनगरमेकं चास्ति । थाईदेशे 'सुराबुरी' नाम्ना एका शुभनगरी अस्ति , यत्र श्वेतशैल्यस्योपरि मारुतिर्दीर्घकायो हस्ते गिरिं धृत्वा स्थितोऽस्ति ।

थाईदेशस्य वाससमये बुरीरामप्रान्ते स्थितं प्रोमूङ्-क्षेत्रं च दृष्टम् । अत्र शङ्करस्य शुभं मन्दिरमेकमस्ति । अस्य मुख्यद्वारि सुफणसहिता सर्पपाषाणमाला विद्यते । अस्य भित्तिषु शिवस्य नृत्ययुक्तं चित्रं खोदितं शोभते । शिल्पकलायां सर्वत्र हिन्दुधर्मस्य वहु प्रभावः दरीदृश्यते । नैके शिल्पाः विपुलरचनाः वा रामायणात् महाभारतात् वा समाद्धृताः सन्ति ।

कविः एसिआ महादेशस्य दक्षिण-पूर्वभागेऽवस्थितं मलेशिया नगरंप्रति रामायणमहाभारतयोराश्रिते सम्मेलने यौगदानार्थं अभ्रमत् । मलयविश्वविद्यालये प्रचाल्यमानस्य सम्मेलनस्यानन्तरं सर्वे प्रतिभागिनः सांस्कृतिकयात्रां चकार । यात्रायामस्यां दृष्टं यत् – तत्र पार्वत्यभूमौ 'रामायणकेव्सनाम्ना' रामगुहाः विभ्राजमानाः वर्तन्ते । यदा गुहायां प्रविष्टाः तत्र रामायणाङ्काः प्रतिमाः शोभन्ते । शयने रतस्य कुम्भकर्णस्य मूर्त्तिरस्ति । कुम्भकर्णस्यास्य निद्रां भङ्क्तुं पार्श्वे नैके भट्टाश्च अटन्ति । सगर्वितः क्रोधमुखः प्रवलप्रतापी सिंहासनारूढः दशाननश्चास्ति । अस्य समक्षं विशाल-लाङ्गूलयुक्तः सुवीरो हनुमान् अपि विद्यते । सुकानने राघवयानम् , सीतायाः कुटीरनिवासः , सुग्रीववृत्तं रणयोधनं वा रामायणस्यान्तर्गतं मूर्त्तिकलानिबिष्टम् । बालकृष्णस्य चित्रमपि अत्र चित्रितमस्ति। यः जले नृत्यन् कालिय-नागस्य दलनं करोति । गुहाया अस्याः रामायणमाश्रितानि चित्राणि सर्वेषां हृदि सर्वं सुखाश्चर्यकरं जनयति ।

युरोपद्वीपस्य प्रसिद्धदेशं इटली-देशं प्रति कविः वव्राज । अत्रापि धार्मिकविश्वासस्य प्रभावः सर्वत्र प्रतिफलितोऽस्ति । अतः मनीषिवर्यैः इटलीयवाचा रामायणस्य काण्डविभागरूपमनूदितमस्ति । द्वादशसर्गे इण्डोनेसियायाः सञ्चरणवेलायां ज्ञातं यत् धार्मिकभावनया तथा रामायणादि काव्यमाश्रित्य तत्रत्यविविधनामानि आहूतानि सन्ति । प्रो.हरिदत्तशर्ममहाभागा इण्डोनेसियायाः 'वाली' नामके प्रदेशे स्थिते 'उदयन विद्यालये' आयोजिते 'द्वितीय-अन्तर्राष्ट्रिय-रामायण-महाभारतसम्मेलने ' योगदानावसरे अपश्यत् यत् , विश्वविद्यालयस्यास्य प्रवेशद्वारस्य सम्मुखे भगवतः

[2]वैदे.म. ८/२०
[3]वैदे.म. ८.३०

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

श्रीगणेशस्य मूर्त्तिरेका विद्यमानास्ति। यथा कविः प्रमाणयति –

बाल्यां स्थितस्तूदयनेन नाम्ना
विद्यालयो विश्वप्रसिद्ध एकः।
प्रतिष्ठिते यत्र बहिः प्रवेशाद्
गणेशमूर्ती शुचिचारुशोभा ।।[4]

शोभायुक्तगणेशमूर्त्तेः संदर्शनेन एव परिज्ञायते यत् – अत्र जनाः कथं धार्मिकभावनया अनुप्राणीताः सन्तीति।

अस्यां बाली-पुर्यां हिन्दुधर्मेण प्रभावितानि वहुनि सुरमन्दिराणि सन्ति। पौराणिकसम्बन्धीयाः पूज्यविष्णुशिवादयः विराजन्ते। हिन्दुत्रिदेवयुक्तानि अत्र त्रीणी स्थानान्यपि विनिर्मितानि। पुष्पैः एकस्थले वीरपाण्डवस्य भीमस्य विशालमूर्त्तिः सुशोभमानास्ति। अत्र सहदेववृत्तं लोकप्रियमस्ति। जनेषु रामायणस्य तथा महाभारतस्य वार्ता ज्ञेया भवति। बाली-नगर्याः समुद्रतटस्य शोभा अतीव रम्या। जलौघमध्येऽधिकशोभमानं मन्दिरमेकं संलक्ष्यते।

आफ्रिकामहादेशस्य 'मौरिशस्' देशः संस्कार-संस्कृति-धर्मदृष्ट्या लघुभारतमिव प्रतिभाति। कविः मौरिशस् धार्मिकनगरीं रामनगरीमिव विज्ञायते इति संसूच्य लिखति –

रामायणं रामकथा च गीता
सुकीर्तनं धार्मिकभाषणञ्च।
वै हिन्दुधर्मः सुरमन्दिरं वा
सर्व हि मौरीशस-नामधेयम् ।।[5]

रामायणं सर्वोत्तमं काव्यमिति मत्वा २००१-२००२ संवत्सरे एतत् रामायणं तावत् राष्ट्रियकाव्यमिति संसदि विधेयकमेकं पारितमत्र। परञ्च रामायणं राष्ट्रियकाव्यमिति अत्र सुघोषितम्। अत्र मौरिशसे रामायणस्य प्रसाराय भव्यरूपं राष्ट्रीयं रामायणकेन्द्रमेकं सुसंस्थापितं विद्यते। अपि च काली-शिव-विष्णु-हनुमान-रामादि देवतानां नैकानि रम्याणि मन्दिराणि विलसन्ति। कविना सुन्दरः श्रीकृष्णविग्रहः तथा पञ्चमुखगणेशः दृष्टः। एवं रूपेण नैकविधमन्दिराणि तथा देवप्रतिमाः वहुत्र शोभमानाः वर्तन्ते। कविः २००८ संवत्सरे अमेरिकां प्रति बभ्राम।अमेरिकायामपि हिन्दुधर्माश्रितलोकबद्धाः दिव्याः देवालयाः विलसन्ति। यत्र समाराध्यदेवतानां सुमूर्तिमाला विराजते शोभते च। भक्तजनैः सामूहिकं सात्विकभोजनं विधीयते। ते पूजां समीचीनतया विधाय भक्तियुताः सन्तः प्रसादं गृह्णान्ति। कविरपि स्वात्मीयजनैः साकं तत्र सुरार्चनाय गतवान् आसीत्। अतः कवेः मुखात् निःसरति -

संयुक्तराज्ये भुवि मन्दिराणि
नैकानि हिन्दुमतदेवतानाम्।[6]

षोडश-विश्व-मेलनस्यानन्तरं कविः कम्बोडियां प्रति सांस्कृतिकयात्रा कृता। अत्रापि हिन्दुधर्मस्य प्रभावो सर्वत्र परिलक्ष्यते। प्रभागेऽस्मिन् त्रिशताधिकानि प्राचीन-सुमन्दिराणि स्थितानि। मन्दिरेषु ब्रह्मा विष्णुः शिवश्च देवाः विराजिताः। पश्चात्तु बौद्धैर्विहितात् प्रभावात् स्थाने स्थाने बुद्धस्य मूर्त्तिः प्रस्थापिता दृश्यते। अत्र प्रस्तरमालिकासु रामायणं तथा महाभारतं वृत्ते सुटङ्कितम्। तेषु चित्रेषु रामरावणयोः युद्धं , बालिसुग्रीवयोः युद्धं , कर्णार्जुनयोः युद्धं , भीष्मस्य शरनिर्मिता शैया , कृष्णेन गोवर्धनधारणं , युद्धेऽर्जुनीयं रथवाहनं तथा च मन्दरशैलयुक्तं सागर-मन्थनं टङ्कितं संदृश्यते। नैकत्र स्वर्गाप्सरसां गणाः विराजिताः सन्ति। नर्क-स्वर्गयोः चित्रमपि परिलक्षितं भवति। क्वचित् इन्द्रराजः

[4]वैदे.म. १२.६
[5]वैदे.म. १४.१२
[6]वैदे.म.१९.३४

© 2024, The Brāhmī

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

क्वचित् करालः यमलोकराजश्च विराजते । क्वचित् यक्षराजः क्वचित् गजयूथराजश्चान्यत्र सुशोभते । एवं रूपेण विदेशेष्वपि धार्मिकचेतना अग्रेसरा भवतीति सिद्धम् । हिन्दुधर्मस्य सामग्रिकमनोभावः समग्रे संसारे दृष्टिपथारूढोऽस्ति ।

**१.२.२ पर्वपालनादि**

विदेशेषु पर्वपालनं विशेषरूपेण सर्वत्र परिलक्ष्यते । बैङ्काक्-वाहुरूप्यस्य दर्शनावसरे अष्टमे सर्गे कविः लिखति – बैङ्काक-नगर्यां महोत्सवादिनां परिपालनमतीव आनन्देन अनुष्ठीयते । पर्वादिषु मूर्त्तिपूजायाः प्रावल्यं परिलक्ष्यते । अपि च भक्तियुतैः दीपैर्माल्यैः कुसुमैश्च मूर्त्तिः पूज्यते। उत्सवादि समये लघु बालाः थाइवेषेण सज्जीभूय गीतवाद्येन साकं नृत्यन्ति । खाद्य– माल्य– फल – कुसुमादि विधात्रे अर्पयित्वा स्वमनसि धृतानि इष्टफलानि च याचन्ते । कविः प्रमाणेन सह ब्रवीति – थाइदेशे पौषे मासे पूजनाह्वानपर्वणः समायोजनं क्रियते । पर्वणः अयमभिप्रायः यत् समयेऽस्मिन् देवः भूम्यामवतरतीति । तदर्थमनेन विश्वासेन जनाः विधिविहितं स्तुत्या वाचा च पर्वदिनमिमं सुष्ठु सम्पादयन्ति । यथा महाकाव्यस्य श्लोकस्यास्य पठनात् ज्ञायते–

पौषे मासे भवति रुचिरश्चोत्सवस्त्र्यम्पवाय-
स्त्वीशो भूम्यामवतरति वै तर्हि विश्वस्यतेऽतः ।
प्रायो रात्रौ दशदिनपरं पूजनाह्वानपर्व
स्तुत्या वाचा च विधिविहितं सुष्ठु सम्पाद्यतेऽत्र ।।[7]

अस्मिन् पर्वणि एका दोला भवति स्म । प्रासादात् हरिहरं दोलनाय नयते स्म । परन्तु , इदानीं सा दोला प्रचालिता नास्ति । अधुना सामान्यरूपेण पूजने भवति। एवं रूपेण उत्सवोऽयं धार्मिकयुक्तो बभूव । इत्थं काले काले भजनं , कीर्तनं , भक्तिगानं, सत्सङ्गः , प्रवचनविधिः पर्वदिनानां चारुचर्या च नितरां प्रचलति ।

अत्र लुआङ्गं नामकमेकं क्षेत्रमस्ति । यदूत्सवानां केन्द्रमस्ति । स्थलेऽस्मिन् 'बुद्धवैशाखपूजा' भवति। पुनश्च अग्निक्रीडापि मान्यते । इतोऽपि अत्र 'रैक्ना' नाम्ना राजकीयपर्वविशेषं प्रचलितं वर्तते । पर्वणि अमात्यमहोदयः स्वहस्तेन हलमुखं धृत्वा भुवि नैकवारं कर्षन् मन्त्रोच्चारणपूर्वकं सुन्दरीकन्यकाभिः साकं बीजं वपति । यथा महाकाव्ये प्रतिपादितमस्ति –

रैक्ना-नाम्ना प्रथितमतुलं पर्व वै राजकीयं
धृत्वा हस्तेन हि हलमुखं यत्र मन्त्री कृषेर्वै ।
मन्त्रोच्चारैर्द्विजजनकृतैः सुन्दरीकन्यकाभिः
सार्धं बीजं वपति भुवि तां नैकवारं हि कर्षन् ।।[8]

पर्वण्यस्मिन् सुविहिते बीजन्यासे सति राजवर्गो गच्छति । तदनन्तरं जनाः त्वरितमिह भूमिमृल्लग्नबीजं संगृह्णन्ति । शुभञ्चेति मत्वा निजनिजकृषिक्षेत्रे वसुमभिलषिताः भवन्ति । भारतस्य प्रभावात् परिवण्यस्मिन् एषा विधिः रचितेति कविना स्पष्टीकृतमस्ति । यथा –

"पर्वण्यस्मिन् सकलविधिना भारतस्य प्रभावः ।"[9]

'दीपावली-महोत्सव' अत्र आडम्बरेण सह परिपाल्यते । कार्तिकपूर्णिमायां लौयक्राथौङ्गनाम आलोकस्य प्रसारणं

[7]वैदे.म. ८.२२
[8]वैदे .म. ८.३९
[9]वैदे.म. ८.४१

सर्वत्र भवति । स्फोटद्रव्याणामपि समयेऽस्मिन् वहु विस्फोटनं क्रियते । स्पोटद्रव्यैः खं सशब्दं द्योतते । होलीतुल्यं 'सौङ्क्रानाख्यं' पर्व च चैत्रमासे अनुष्ठीयते । पर्वण्यस्मिन् जनाः परस्परं बहुजलभरैरार्द्रयन्ति । तथा च मुखादिषु श्वेतैश्चूर्णैः लेपनं कुर्वन्ति । यथा –

सौङ्क्रानाख्यं भवति महितं पर्व वै चैत्रमासे
होलीतुल्यं सलिलकलितं स्नापनं बुद्धमूर्तेः ।
अन्योन्यं वै बहुजलभरैरार्द्रयन्तीह लोकाः
श्वेतैश्चूर्णैर्विदधति मुखे लेपनं लीलया ते ।।[10]

थाइदेशस्यानन्तरं द्वीपैशियायाः सुललामभूतं 'सिङ्गापुरं' सहर्षं प्रस्थितवान् । अत्र सर्वत्र निर्मलता विराजते। व्यवस्था च नियमैः बद्धा दृश्यते । अवकाशकाले विहारसौख्यमनुभवितुं वैदेशिकाः पर्यटका अत्र समागच्छन्ति । पर्वपालनावसरे सिङ्गापुरस्य सौन्दर्यम् इतोपि वर्द्धितं भवति । अतः कविः प्रकाशयति यत् डिसम्बरमासस्यान्तिमसमये शीतकाले 'क्रिसमस-पर्वणि' सिङ्गापुरं तावत् सुसज्जनववधूसमानं संलक्ष्यते । यथा महाकाव्ये –

दिसम्बरान्ते सुखशीतकाले
प्रसारिते क्रिसमसपर्वलासे ।
सिङ्गापुरं नव्यवधूसमानं
शृङ्गार-सौन्दर्य-सुसज्जमानम् ।।[11]

सर्वत्र मार्गेषु तथाऽऽपणेषु प्रकाशचक्राणि उज्ज्वलानि भवन्ति । दीप्तिं नवाभाञ्च प्रसारयन्ति । समुल्लासम् अवतारयन्ति । क्रिसमस-पर्वणः समये सिङ्गापुरं तावत् स्वर्गीय-सौन्दर्य-प्रतीकभूतं प्रतिभाति । षोडशविश्वसंस्कृतसम्मेलने योगदानाय कविना कम्बोडियादेशं प्रयातम् । अत्रापि 'भूकर्षणं' नामकस्य पर्वणः परम्परा परिलश्क्ष्यते । पर्वण्यस्मिन् तत्रत्यराजा ग्रीष्मकाले क्षेत्रे स्वयं हस्ते बलीवर्दहृतं हलमादाय पृथिव्यामुपरि चलति । भूकर्षणरूपी 'परम्परा' आदौ एव राज्ञा प्रारभ्यते । ततः परं तत्रत्य जना अपि पर्वणः यथाविधिमनुसरन्ति । तदर्थं रथोमहोदयेनोच्यते –

क्षेत्रे विशाले इह ग्रीष्मकाले
राजा बलीवर्दहृतं हलं स्वम् ।
आदाय हस्ते चलति पृथिव्यां
भूकर्षणं पर्वपरम्परेयम् ।।[12]

'अमेरिका' देशे पर्वणः समायोजनं सुन्दरतया परिलक्ष्यते । अत्र मृतानां संस्मरणे अक्तूवरमासे पूर्वप्रथातः चलितं 'हालोविन' नामकं पर्व लोकैः परिपाल्यते । यथोच्यते –

अक्तूबरे संस्मरणे मृतानां
हालोविनं नाम विचित्रमेकम् ।
पूर्वप्रथातश्चलितं तु पर्व
सुमान्यते रूढिवशाद्धि लोकैः ।।[13]

पर्वण्यस्मिन् जनाः गृहाणामग्रे प्रेतात्मरूपाः पुरुषाकारं चित्रं स्थापयन्ति । भयावहाः स्त्रीः च चित्रयन्ति । पर्वणः दिनेऽन्तिमे बालाः भीषणरूपवेशेषु सज्जीभूय गृहन्तराणि समागत्य अतीव आनन्देन मिष्टान्नमुपायनं गृह्णन्ति तथा कीडन्ति , धावन्ति समुच्छलन्ति च । प्रेतात्मस्वरूपस्य शान्तिः कथं समागच्छेत् इत्येव पर्वणः मुख्यमुद्येश्यम् ।

[10] वैदे.म. ८.४३
[11] वैदे.म. १३.१८
[12] वैदे.म. २०.४८
[13] वैदे.म. २१.९३

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

अस्माकं देशे प्रवर्तनीयं रामलीलापर्व सदृशम् अत्रापि विजयदशम्यां 'रावणघातलीला' सुपर्व विधीयते । प्रवासिभारतीयैः निजोत्सवाः आनन्देन अत्र क्रियन्ते । अत्र दीपावली , होली, दुर्गोत्सवः , लक्ष्मीपर्व तथान्य भारतीय पर्वाणि अनुष्ठीयन्ते । गारबादिनृत्यं बहुमञ्चनाट्यं च प्रदर्श्यते । दीपप्रकाशवेला दीपावली तथा बहुरङ्गखेला होली च अतीव सुन्दरतया अत्र सुमान्येते । अतः कविः कथयति विदेशेऽपि सर्वोत्सवाः देशप्रथानुरूपं सम्पाद्यन्ते इति । यथा महाकाव्येऽस्मिन् प्रकाश्यते –

स्वतन्त्रता पञ्चदशे ह्यगस्ते
सुराष्ट्रियाः संस्कृतिसिद्धमेलाः ।
सर्वं विदेशेऽपि निजोत्सवादि
सम्पाद्यते देशप्रथानुरूपम् ।।[14]

**१.२.३. अतिथिपूजनम् –**

सतां सज्जनानाम् वा आचारः सदाचारः । 'आचारः परमो धर्मः'[15]– इति मनुस्मृतौ प्रमाणीक्रियते । भिन्नार्थे सद्गुणयुक्तोऽऽचारः सदाचार इति परिज्ञायते । सदाचारस्य महत्वविषये महाभारते प्रमाणितमस्ति –

सदाचाराद् यशो लोके सदाचारात्सुखं दिवि ।
सदाचारातद् भवेन्मोक्षः सदाचारो हि कामधुक् ।।[16]

अतः अतिथिसेवाक्षेत्रे वैदेशिकानां सदाचारविषये कविः बहुत्र समाजमुपदिशति। कवेः अनुभवे विदेशे नागरिकाणां सदचारज्ञानं नैव साधारणम् । यथा यजुर्वेदे प्रकाशितं वर्तते –

यस्तु सर्वाणि भूतान्यात्मन्नेवानुपश्यति ।
सर्वभूतेषु चात्मानं ततो न विचिकित्सति ।।[17]
यस्मिन्सर्वाणि भूतानन्यात्मैवाभूद् विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।।[18]

ऐक्यभावः प्रत्यकमपि मानवं उच्चस्थानं प्रति नयति इति शास्त्रोपदेशः। एतदनुसारं स्वकार्यार्थं वहिर्प्रदेशात् समागतानाम् अतिथिनां कृते वैदेशिकानाम् आत्मभावः सर्वदा परिलक्ष्यते एव । कविः संस्कृतस्य सेवार्थं शर्मणीं (जर्मनीं) प्रत्यगच्छत्। तदा तत्र पश्चिमसंस्कृतीनां भव्यं मास्को-विमानस्थलं अवलोक्य अपरस्मिन् प्रभाते शर्मण्यदेशीयमतीव रम्यं शोनफील्डं विमानपट्टं प्राप्तवान् । तदा कवेः सुस्वागतार्थं सोर्गेलनाम्नी काचित् महिला समागत्य श्रद्धया अभ्यागतवासकक्षं प्रति तान् निनाय।प्रमाणस्वरूपं शर्मण्य-प्रयाणम् इति प्रथमसर्गस्य एकविंशति श्लोके कविः लिखति –

सोर्गेलनाम्नी महिला समायान्
मदीय-सुस्वागत-कार्यहेतोः ।
नीतस्तयाऽऽभ्यागतवासकक्षं
मार्जाननाम्न्यां वसतौ नवायाम् ।।[19]

[14]वैदे.म. २१.९९
[15]मनुस्मृ.१.१०८
[16]महा.
[17]यजु. ४.६
[18]यजु. ४.७
[19]वैदे.म. १.२१

© 2024, The Brāhmī 

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

एतस्मात् ज्ञायते अतिथिसत्कारक्षेत्रे कथं तेषां व्यवहारो अभूदिति । विदुषां चित्रमालामिमां दर्शनाय सा महिला सत्कारवाचा कविमभिनन्दितवती ।

तस्या एतादृशी व्यवहारः, तत् प्रदेशजनानामतिथिपूजनस्य पारङ्गमतां प्रदर्शयति । अपि च सः कविना साकं स्थित्वा विभागस्य सामग्रिकवर्णनं कृत्वा स्वशोधकार्यं कथयामास ।विभागे तत्र संस्कृतशिक्षणस्य गुरुः रोथोमहोदयरभूत् । रोथोमहाभागेन शर्ममहाभागस्य स्वागतमतीव स्नेहपूर्णभावेन कृतम् ।भवनस्य प्रवेशादनन्तरं तत्रत्यविंशतिशिक्षकैः सह एतस्य परिचयोऽपि संजातः । अतः कविः स्वीयमुखेन तेषामतिथिसत्कारस्य विषये उवाच–

सत्कारपूर्वं भवनं प्रविष्टः
सुस्वागते गौरवमन्वभावि ।
अध्यक्षवर्यैः परिचायितोऽहं
सार्धं पुनर्विंशतिशिक्षकैस्तैः ।।[20]

तेषां संस्कृतस्याभिरुचिः तथा सांस्कृतिकव्यवहारः सर्वदा मनमुग्धकरो भाति । वक्रोक्तिजीविते उच्यते –

व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः ।
सद्काव्याधिगमादेव नूतनमौचित्यमाप्यते ।।[21]

पूर्वजर्मनदेशभागे वसन् अनन्तरं पश्चिमभागं द्रष्टुमभिदेशं यात्रां चकार । वैदेशिकविदुषा हान-महोदयेन निमन्त्रितः सन् प्रो.हरिदत्तशर्ममहाभागः तस्य गृहे संस्कृतगीतिगानमकरोत् ।

एकदा जर्मनी-देशे स्वयात्रारूपकमनुसन्धानं निर्वाह 'लाइडिन विश्वविद्यालये' (Leiden University ) समायोजिते 7th World Sanskrit Conference कार्यक्रमे योगदानार्थं नीदरलैण्डदेशस्य लाइडिनं पुरं प्रति गतवान् कविः । तदा तत्र दूरदेशीयानां कृते वासव्यवस्थाया परिकल्पना चारुतया कृता संलक्ष्यते इति कविना प्रमाणीकृतम्। ते दूरदेशीयवन्धुजनानां सेवार्थं सर्वदैव अग्रगण्या इति प्रतिभान्ति । एतदेव कविः प्रकाश्य उल्लिखति –

समागतो लाइडिनं पुरं हं
सुप्रापितो विश्रम-वासगेहम् ।।[22]

पारम्परिकक्षेत्रेऽपि तेषां व्यवहारिकज्ञानं समुचितमासीत् । अनेकचर्चासु सर्वदा निमज्जिताः भवन्ति। भारतीयसंस्कृतेः प्रभाववशात् सम्मेलनस्यान्तिमशृङ्खलायां मधुरमुपहारोऽपि प्रदीयते स्म। कथं वैदेशिकसंस्कृतपण्डिताः सर्वकार्येषु सहायकाः भवन्ति , तस्योदाहरणस्वरूपे महाकाव्येऽस्मिन् द्रष्टुं शक्यते यत् – कविः 'विश्वविद्यालय-अनुदान-आयोगेन' चितो भूत्वा फ्रान्स इत्यस्य राजधानीं 'पेरिसं' प्रति बभ्राम। तत्र फ्रान्सदेशस्य संस्कृतपण्डितः महान् विन-ज्याँ-फिलियोजपुत्रः फिलियोजेन साकं मिलितः । अनेन सह कविः तत्र स्थितं राष्ट्रियग्रन्थालयं प्रति जगाम । यत्र प्राच्यविद्यायाः वहूनि पुस्तकानि शोभन्ते । कविः स्वयं वहु पाठ्यहस्तलिखितान् संगृहीतवान् । एततसर्वमपि फिलियोज-महोदयस्य वशादेव सम्भवपरोऽभूत्। वैदेशिकाः छात्रा अपि अतीव सहायकशीला आसन् । एकदा कविना एकया छात्रया साकं तस्याः

[20]वैदे.म. १.३३
[21]व.जी.
[22]वैदे.म. ४/६

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

यानेन गत्वा पेरिसनगरस्थं 'वर्साइलं' रुचिरराजगृहं च परिदृष्टम् ।

सुकन्याः पारम्परिकैः सुवेषैः विनम्रभावैः च बहुपुष्पगुच्छया साकं दूरदेशात् समागतानाम् अतिथिनां स्वागतं कुर्वन्त स्म । अतः प्रकाश्यते –

कन्याश्च पारम्परिकैः सुवेषै-
र्विनम्रभावैरभिनन्दनं ताः ।
कुर्वन्ति मोदेन समागतानां
शोभा ह्यहो साञ्जलिसुन्दरीणाम् ।।[23]

तेषामतिथिसत्कारस्य सद्भाव इतः परिज्ञायते । थाइदेशे निवसन् नवपर्यटनं प्रति प्रत्यक्ष्यमाणे समये प्रो.शर्ममहोदय एशियामहादेशस्य सुललामभूतं सिङ्गापुरं प्रति बभ्राम ।सिङ्गापुरेऽपि भारतस्य संस्कृतिः सुचारुतया परिलक्षिता शोभते । आतिथ्यस्य समुचितं ज्ञानं तत्रस्थ जनेषु वर्तते एव । कविः उदाहरणपूर्वकं स्वानुभवं प्रकटयन् कथयति –

मित्रेण चैकेन सुसंस्कृतेन
निमन्त्रितोऽहं वचनं प्रदातुम् ।
श्रीरामकृष्णाश्रमसन्निधाने
सत्सङ्गमः सैष सदाभिबन्द्यः ।।[24]

अत एव रामराज्यभूतमालिङ्गनपूर्वकम् अतिथिसत्कारेण स्वीयसंस्कारस्य पराकाष्ठां प्रदर्शयति अयं देशः। अतिथिसत्काररूपकं ज्ञानं वैदेशिकानां समीपे नितरां वर्तते इत्यस्मात् परिज्ञायते । वैदेशिका उल्लास-संलापरसेषु मग्नाः भवन्ति । अतिथिनां मनोविनोदनार्थं रम्यस्थलानां दर्शनं कारयन्ति । नानासभापक्षतः सादरपूर्वकं निमन्त्रणं च कारयित्वा अतिथिजनानां यथोचितसम्मानं क्रियते । हितोपदेशस्य वचनानुसारं यथा –

अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानान्तु वसुधैव कुटुम्बकम् ।।[25]

एतदनुसारं वैदेशिकजना अस्यां विश्वबन्धुत्वभावनायां सर्वदैव निवद्धिता बभूवु इति सिद्धम् ।

### १.२.४ पूर्वपुरुषाणां स्मरणम्

भारतीयसंस्कृतौ पूर्वजानां स्मरणं पुण्यमिति प्रमाणितम्। एवमेव भारतीयसंस्कृतिप्रभावेन प्रभाविताः वैदिशेकाः अपि स्वपूर्वजानां स्मरणाय प्रसिद्धस्मारकप्रभृतीनां नामकरणं पूर्वजैः नाम्ना कुर्वन्ति । यथा शर्मण्यदेशे बर्लिने नगर्यां 'हम्बोल्टविश्वविद्यालयः' वर्तते । विश्वविद्यालयोऽयं हम्बोल्टनामक कस्यापि प्रसिद्धविदुषः नाम्नैवाङ्कुरितोऽस्ति । तत्रत्य विश्वविद्यालयानां विभागेषु पूर्वाचार्याणां स्मारकं यथास्थाने शोभते । कविः यदा हम्बोल्टविश्वविद्यालये स्थितं भव्यैशियाकेन्द्रं प्रति चचाल , तदा तत्रापश्यत् यत् – फ्राञ्जबाप – वेबर – पिशेलो – वाल्टेररूबेनादि विज्ञपुरुषाः ये विभागसेवां क्रमेण चक्रुः तेषां सर्वेषां चित्रमाला स्थाने स्थाने विराजते। यथा कविः स्ववचसा प्रमाणयति –

[23] वैदे.म. १२.९
[24] वैदे.म. १३.१०
[25] हितोपदेश १.६९

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

तस्यैव कक्षे हि विराजते स्म
सुचित्रमाला सुधियां समेषाम् ।।[26]

तथैव कार्लमार्क्स नामक विचक्षणवुद्धिसम्पन्नस्य नामानुसारं कार्लामार्क्सविश्वविद्यालयश्चावस्थितोऽस्ति । विदेशे पूर्वपुरुषाणां गुणगाने कुत्रापि न्युनत्वं न परिलक्ष्यते । जर्मन्याः 'हाले' नामके नगरे मार्टिनलूथराऽऽख्यः रुचिपूर्णः विद्यालयः प्रस्थापितः । पूर्वपुरुषाणां स्मृतौ स्मारकसंग्रहालयाः वर्तन्ते । 'पुश्किन-शेक्सपीयर' इत्यादिनां विदुषां मूर्त्तिरूपश्च निर्मितमस्ति ।

सर्वत्र पूर्वजानां स्मरणं यथोचितभावेन क्रियते । फ्रान्से समुद्भूतानां संस्कृतविदुषां नामानि सर्वदैव जनस्मृतिपटले दोलायमानानि सन्ति । पेरिस्-पर्यटनवेलायां कविना ज्ञातं यत् – सिल्वान – लेवि – लुइरेनु – आर्मण्ड – लूडविक् – ज्याँ – फिलियोजसंज्ञकाः संस्कृतज्ञाः फ्रान्से भुवि बभूवु इति । थाईदेशे चम्लोङ्ग सर्फङ्नुकनाम विद्वान् अस्ति , येन मूलसंस्कृतस्य थाईभाषायां छात्रोपयोगीनि बहूनि पुस्तकानि रचितानि । अस्मात् कारणात् अस्य नाम तत्र सुविदितं वर्तते । पूर्वजानां स्मरणपूर्वकं तत्र गुरु-शिष्य परम्परा सुरक्षिता सुशोभिता च वर्तते ।

पुनश्च कविः २००१ संवत्सरे युरोपमहादेशस्य प्राज्ञदेशम् इटलीं प्रति जगाम ।इटली देशे तत् देशस्य विदुषां नामानि सुचारुतया सर्वत्र भान्ति। इटलीदेशे गोरेशिया नाम विद्वान् संस्कृतपीठमेकम् अस्थापयत् ।टूची , ग्नोली , बोकली चादि संस्कृतमनीषिणोऽपि बभूवुः । एतेषां सम्मानाय तस्मिन् देशे वहुत्र तेषां प्रतिमूर्तिस्थापनं पुण्यस्मरणमपि भवति। इतः ज्ञायते पूर्वप्रसिद्धसंस्कृतविदुषां सम्माने तेषां ख्याते चर्चा क्रियते ।

## १.३. उपसंहारः

प्रो.हरिदत्तशर्मणा विरचितं वैदेशिकाटननमहाकाव्यं विद्योपजीविनां कृते ज्ञानोपासकानां कृते च प्रकाशस्तम्भसदृशम् । भारतीयसंस्कृतेः प्रभावः विश्वे भिन्नभिन्नदेशेषु कथम् अनुसरणं भवति इति महाकाव्यस्यास्य पठने सुष्ठु ज्ञातुं शक्यते। विशेषतया संस्कृतभाषायाः विश्वे सम्मानं कथमिति अत्यन्तं सरलतया भाषया छन्दोवद्धकविताश्रृङ्खलया ज्ञातुं शक्यते।

प्रादेशिकभाषा अपि इदानीं संस्कृतस्य तथा भारतसंस्कृतेः बलेन सुसमृद्धा तथा सम्बर्धिताः भवन्ति । विज्ञानस्य तथा आधुनिकजीवनस्य विविध व्यवसायोद्योगकलाकौशलादिषु च भारतसंस्कृतेः शरणमेवाभीष्टमार्गः । केवलं अनुसन्धानं साग्रहं करणीयम् । अतः शोधपत्रेऽस्मिन् भारतसंस्कृतेः महत्वं दिनानुदिनं कथं परिवर्धते इति सर्वमपि विषयं स्पष्टतया उल्लिखितं वर्तते ।

[26]वैदे.म. १.२८

**संन्दर्भग्रन्थसूची**

1. वैदेशिकाटनं महाकाव्यम् – प्रो. हरिदत्तशर्मा , प्रकाशकः –रा.सं. संस्थानम् , नईदिल्ली
2. संस्कृत में विज्ञान एवं वैज्ञानिक तत्व , प्रकाशकः – संस्कृतविभाग , इलाहाबाद विश्वविद्यालय , इलाहाबाद
3. SANSKRIT STUDIES OUTSIDE INDIA , On the occasion of 10th World Sanskrit Conference , Bangalore , 1997 , Published by : R.S.S , New Delhi – 110058
4. Bharati Agehananda , A functional analysis of Indian thought and its social margins , Chowkhamba Sanskrit Studies 36 , Banaras , 1964
5. डॉ. गजाननशास्त्री मुसलगाँवकर एवं प. राजेश्वर ( राजू) केशवशास्त्री मुसलगाँवकर , बैदिक साहित्य का इतिहास, चौखम्बा संस्कृत संस्थान , वाराणसी-२२१००१ , २०१८

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

# स्वातन्त्र्योत्तरसंस्कृतसाहित्यं प्रति पण्डितप्रबोधकुमारमिश्रस्य अवदानम्

(Contribution of Pandit Prabodha Kumar Mishra to Post-Independence Sanskrit Creative Literature)

Laxman Majhi
Ph.D. Research Scholar
P.G. Department of Sanskrit
Utkal University, Vani Vihar,
Bhubaneswar

**शोधसारः -**

शोधपत्रेऽस्मिन् स्वातन्त्र्योत्तरसंस्कृतसाहित्यं प्रति पण्डितप्रबोधकुमारमिश्रस्य अवदानम् विषयः आलोचितः । प्राचीनकाले गौरवं प्राप्तवती संस्कृतभाषा क्रमेण भारते मन्त्रजप-पदवीं प्राप्तवती अस्ति । तत्र सरकारी-माध्यम-पूजा-भाषा-संस्थानां उपक्रमाः सन्ति-असरकारी, अपि च केचन जनाः स्वतन्त्रतया संस्कृतस्य भूतवैभवस्य पुनरुत्थानार्थं कार्यं कुर्वन्ति । -एतादृशस्य उपक्रमस्य विस्तारं तस्य सफलता च तस्य मापनं करणीयम्। विदेशशासनकाले गम्भीरं विघ्नं प्राप्य विशेषतया ओडिशानगरे विंशतिशतकस्य आरम्भादेव संस्कृतशिक्षणस्य पुनरुत्थानं विविधरीत्या प्रारब्धम् । विज्ञानस्य प्रौद्योगिक्याः च उन्नतिकारणात् पुनरुत्थानस्य एषा प्रक्रिया अत्यन्तं मन्दं स्थिरं च अभवत् । अनेकाः सृजनात्मकाः लेखकाः स्वतन्त्रता-वृत्तेः योग्यं उत्तरं दातुं -शासकानाम् अवमानना-काव्यानि रचयित्वा ब्रिटिश-आन्दोलने निमग्नाः भूत्वा संस्कृतेन देशभक्ति -प्रयत्नाः कृतवन्तः । ये प्रादेशिकभाषायाः आन्दोलनं न्यूनीकृतवन्तः ते राज्ये संस्कृतस्य पूर्णतया पुनरुत्थानं संस्कृत-गम्भीर शिक्षणव्यवस्थां च अनुमन्यते स्म । ओडिशासाहित्यस्य च स्वातन्त्र्योत्तरकालः -अध्ययनस्य तस्य सृजनात्मक-राज्ये संस्कृत-स्थितौ अस्ति-केषुचित् क्षेत्रेषु ग्लैमर, अतीतानां केषाञ्चन गौरवपूर्ण-स्थितौ अस्ति । ओडिशा-संस्थानां सन्दर्भे तु करुण-अध्ययनेषु-राज्यस्य संस्कृत समृद्धीकरणे योगदानं दत्तस्य समृद्धा परम्परा अस्ति । आधुनिकसंस्कृतसाहित्यरचनाक्षेत्रे उत्कलीयकवीनां योगदानं अतुलनीयम् ।

संस्कृतं विश्वस्य प्राचीनतमासु जीवभाषासु अन्यतमा अस्ति । एषा भाषा भारतीयसभ्यतायाः विविधचरणयोः माध्यमेन स्वस्य प्राचीनतायाः, निरन्तरतायाश्च कृते च बहुधा प्रसिद्धा अस्ति । ओडिशाराज्ये संस्कृताध्ययनस्य वर्तमानस्थितिः अपि अतीव उत्साहवर्धकम् अस्ति । ओडिशाराज्यं संस्कृताध्ययनं कृते प्रसिद्धम् अस्ति । ओडिशाराज्यस्य पाण्डित्यसमुदायस्य अपि महती संख्या वर्तते, सारगर्भितविषयाणां चयनं कृत्वा, उत्तमकृतीनां रचनां कृतवन्तः तथा च वयं गर्वेण वदामः यत् आधुनिक साहित्यस्य समृद्धीकरणे तेषां विद्वांसः अपारं योगदानं दत्तवन्तः-संस्कृत-| तेषु स्वातन्त्र्योत्तरसंस्कृतसाहित्यं प्रति पण्डितप्रबोधकुमारमिश्रस्य अवदानम् अतुलनीयम् ।

**कूटशब्दाः** –सांस्कृतिक, दूतकाव्य, जातीयतावादी, सामाजिक, राजनैतिक, राष्ट्रियभावना, मानवमूल्यबोधः

**उपक्रमः -**

आधुनिकं सर्वदा प्राचीनमपेक्षते । अतः आधुनिकता सर्वदा गतिशीला । पूर्वकालस्याधुनिकता वर्तमानकालस्य प्राचीनता । वर्तमाने या आधुनिकता भाविनि काले सापि प्राचीना भविष्यति । यत्किमपि भवतु, परन्तु साहित्यं भवेत् युगानुकूलम् । वाक्यमिदं यथा पुराकालस्य कृते अविसंवादितमस्ति तथैव आधुनिककालस्य कृते । आधुनिकसंस्कृतसाहित्यस्य गहने दृष्टिनिक्षेपे सति दृश्यते प्राचीनकाव्यपरम्परया सह साम्प्रतिककाले लिखितानां काव्यानाम् अङ्गविन्यासप्रे-चरित्र-षयवि-शैली-क्षापटलिखनपद्धत-प्रयोजन-विचारधारा-भाषा-िसु सामाजिकसांस्कृति-राजनैतिक-क-धर्मीयादिषु स्थितिसु च महत्तरं परिवर्तनं संघटितम् ।

**पण्डितप्रबोधकुमारमिश्रस्य देशकालकृतयः-**

संस्कृतसाहित्याकाशे देदीप्यमाननक्षत्रमण्डलेषु शरत्कालिकचन्द्रः इव उत्कलप्रदेशस्य पण्डितप्रबोधकुमारमिश्रस्य महत्वपूर्णमस्थानमस्ति । सकलशास्त्रावगाहिबहुमुखप्रतिभायाः धनिकेन पण्डितप्रबोधकुमारमिश्रेण स्वमौलिकचिन्तनेन

© 2024, The Brāhmī

आलोचनेन सूक्ष्मसमीक्षणेन च परम्परागत संस्कृतकाव्यशास्त्रस्य नूतनं दिग्दर्शनं कृतम् । अस्य मौलिककाव्यानां सृजनात्मकता, सूक्ष्मतत्वान्वेषणी दूरदर्शिता विविधरसानां परिपाकेन लालित्यपूर्णकाव्यानां प्रतिपादकभावानां नूतनाभिव्यञ्जकता च विशिष्टा एव । अतः असौ महान् कविः 'उत्कलकालिदासः' 'अभिनवकालिदासो' वा इति कथ्यते ।

**समयः-**

'प्रज्ञाकुमार' इति विशेषणेन विभूषितो पण्डितप्रबोधकुमारमिश्रः १९४३ तमे वर्षे अक्टोबरमासस्य अष्टादशदिनाङ्के जनिमलभत ।

**जन्मस्थानम्-**

भारतदेशस्य उत्कलप्रदेशस्य कटकमण्डलान्तर्गते सरपड़ा नामके ग्रामे कवेर्जन्म अभवत् । एष ग्रामः कटकमण्डलात् प्रायशः पञ्चसप्तति 'किलोमीटर' दूरे स्थितः । पण्डितप्रबोधकुमारमिश्रः पितुर्नामः -स्वर्गीय श्रीसोमनाथमिश्रः मातुर्नामः-स्वर्गीय श्रीमती उदियादेवी, स्वर्गीय श्रीमती रमादेवी च । कवेर्पितुर्नाम स्वर्गगतसोमनाथमिश्रोऽस्ति । सोमनाथस्य पत्नीद्वयमस्ति । ते भवतः श्रीमती उदियादेवी श्रीमतीरमादेवी च पण्डितप्रबोधकुमारमिश्रः सोमनाथस्य प्रथमपत्न्याः श्रीमत्याः उदियादेव्याः पुत्रोऽस्ति ।

**कवेर्धर्मः-**

पण्डितप्रबोधकुमारमिश्रः सनातनहिन्दूधर्मावलम्बी शाक्तो प्रतीयते । यतोहि उत्कलप्रान्ते 'झङ्कड़' इति नाम्ना सुप्रसिद्धदेवीपीठोऽस्ति । तत्र 'शारला' इति नाम्ना प्रसिद्धा देवी आसीत् । पण्डितमिश्रः तस्याः देव्याः भक्तोऽस्ति । यतोहि सः प्रत्येकस्य काव्यस्यारम्भे तस्याः स्तुतिं कृतवान् यथा स्वप्नदूतस्यारम्भे- -

जननि !झङ्कड़पीठवले!
सदा सुर-सुरारिगणार्चितपादके ।
चरणयोस्तव देवि !नु शारदे ।
प्रददतेऽयमिमां तनयस्तव ।"

**कवेरुपाधयः-**

i. संस्कृतसाहित्याचार्यः ।
ii. हिन्दीभाषायां राष्ट्रभाषाकोविदः।
iii. कादम्बरी विशेषज्ञः ।
iv. वाराणसीतः संस्कृतविशारदः।

**काव्यकृतयः -**

लोके कविः काव्यसृस्टिरचनाधारेण सुपरिचितो भवति । संस्कृतवाङ्मये पण्डित प्रबोधकुमारमिश्रेण संस्कृतभाषया उत्कलभाषया च बहूनि पुस्तकानि विरचितानि सन्ति तेषु राष्ट्रीयगौरवगाथाः, संस्कृतभाषायाः समुपयोगिता, महापुरुषाणां जीवनचरित्राणां चान्यान्यपि काव्यानि विरचितानि, तेषां महत्वं विद्वद्जनानाङ्कृते बहुमानं वर्तते । पण्डित प्रबोधकुमारमिश्रस्य कृतीनां संक्षिप्तवर्णनमत्र प्रस्तूयते ।

**संस्कृतरचना-**

पण्डितप्रबोधकुमारेण संस्कृतभाषयाऽष्टादशपुस्तकानि विरचितानि । तेषु सप्तदूतकाव्येषु महत्वपूर्ण स्थानमस्ति ।

अपरेष्वेकादशपुस्तकेषु कानिचिदनुवादपुस्तकानि, विविधविषयाणामाधारीकृत्य पुस्तकानि च विरचितानि सन्ति । तेषां क्रमशः वर्णनं संक्षेपतयाऽत्र प्रस्तूयते ।

**स्वप्नदूतम्-**

स्वप्नदूतमेकं प्रणयपूर्णं काव्यमस्ति । काव्येऽस्मिन् काचिन्मुग्धानव परिणयोन्मादिनी प्रणयिनी दिल्लीपूर्ध्यां स्थितं प्रियतमं प्रति स्वप्ने सारिकायाः माध्यमेन सन्देशं प्रेषयति । काव्यस्यास्य मुखबन्धः भारतदेशस्य दिवङ्गतप्रज्ञापुरुषेण डा . राधाकृष्णनमहोदयेन विलिखितमस्ति । अपि च तदानीन्तनेन राष्ट्रपतिना वी.वी .गिरिमहोदयेन 1974 तमे वर्षे काव्यमिदं पुरस्कृतम् । काव्येऽस्मिन् भुवनेश्वरतः देहलीनगरी यावन्मार्गस्य वर्णनमस्ति । अपि च मन्दाक्रान्ताछन्दसा सह विविधानि छन्दांसि प्रयुक्तानि सन्ति ।

**मलयदूतम्-**

मन्दाक्रान्ताछन्दसा विरचिते दूतकाव्येऽस्मिन् जातीयमुक्तिसंग्रामस्य मूर्तभावना लीलायिता । सामाजिक-राजनैतिकदृष्ट्या काव्यमिदं समृद्धम् । काव्येऽस्मिन् एको स्वाधीनतासंग्रामी कारागारे अवरूद्धः सन् मलयसंविधे स्वस्य हृदयानुभूति प्रकाश्य देशवासीनां पुरतः सन्देशमुपस्थापयितुं निवेदयति । अतः काव्यमिदं राष्ट्रियतायाः काव्यमित्युघोषयन् ते विद्वद्भिः । 1989 तमे वर्षे उत्कलसंस्कृतसाहित्याकादमीतः काव्यमिदं पुरस्कृतम् ।

**रक्तझङ्कारम्-**

राष्ट्रियचेतनाऽऽधारिते काव्येऽस्मिन् एका स्वाधीनतासंग्रामिणी नारी स्वाधीनतासंग्रामं स्मृत्वा शुकस्य समक्षे तस्याः मानसिकीव्यथां प्रकटयति । काव्येऽस्मिन्विश्वमानवतावादी चिन्ताचेतनायाः प्रकाशः छन्दोबद्धरचनया प्रकटितः । काव्येऽस्मिन् मानवानां प्रति नैतिकसन्देशं प्रकाशितम् ।

**प्रज्ञादूतम्-**

उच्चदार्शनिकचिन्तनयुक्तेऽस्मिन् काव्ये भवन-ममता-सौख्य-लोभादिमुक्तः कश्चित्साधुः स्वस्य प्रज्ञां दूतत्वेन नियोज्य विश्वविषये समाजविषये च तस्यानुभवं मानवसमाजं प्रति प्रेषयति । काव्यमिदं भर्तृहरेः वैराग्यशतकं स्मारयति । अपि च "ब्रह्मसत्यं जगन्मिथ्या "इति तत्वं प्रतिपादितमवलोक्यतेऽत्र ।

**स्मृतिदूतम्-**

काव्येस्मिन् मानवहृदयस्य विभिन्नाः अवस्थाः वर्णिताः । प्रणय-दर्शनं चाऽत्र समभावेन प्रकाश्यते । अत्रेक : चिन्तानायक :स्मृतिं प्रत्युपालम्भो प्रदीयते । विविधछन्दसा प्रयोगोऽत्र दृष्टव्यः ।

**मानसदूतम्-**

राजनीतिक- सामाजिक विषयाणामाधारीकृत्य विरचितेऽस्मिन् काव्ये एका स्वतन्त्रतासंग्रामिनी नारी दिवङ्गतं महात्मागान्धिनं प्रत्येकेन शुकमाध्यमेन सन्देशं प्रेषयति, साम्प्रतिके भारते सर्वस्मिन् क्षेत्रे यदवमूल्यायनमवलोक्यते तद्विषये महानक्षोभः प्रकटितोऽत्र ।

**तमसादूतम्-**

काव्येऽस्मिन् सृष्टितत्वविषयिणी चिन्ता प्रकटिता । प्रकाशः अन्धकारादायाति, तमन्धकारं तमसारूपे दूतत्वेन नियोज्य तया मानवसमाज प्रति सन्देशं प्रेषयति । सृष्टितत्वविषयिणी चिन्ता प्रकटिताऽत्र । दूतकाव्यान्येतानि विहाय पण्डितप्रबोधकुमारमिश्रस्य संस्कृतभाषया विलिखितान्यन्यानि बहूनि काव्यानि सन्ति । तेषां क्रमेण विवेचनमत्र मया प्रस्तूयते ।

**कलाकुसुमम्-**

विविधान् विषयानामाधारिकृत्यः संस्कृतकविताऽत्र संकलितास्सन्ति । पुस्तकस्यास्य मुखबन्धः डा.एस.राधाकृष्णन

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

महाभागेन विलिखितः ।

**कौमुदी-**

काव्येऽस्मिन् प्रशस्तिशूचकाः संस्कृतश्लोकाः संकलिताः सन्ति ।

**मूर्च्छना-**

काव्येऽस्मिन् विभिन्नावसरे संकलिताश्लोकाः सन्ति ।

**प्रियदर्शिनी इन्दिरा-**

भारतदेशस्य दिवङ्गताप्रधानमन्त्री श्रीमती इन्दिरागान्धेः हत्यामाधारीकृत्यः विरचिते काव्येऽस्मिन् चतुस्संख्यकाः संस्कृतकविता उत्कलभाषया विरचितं कविताद्वयञ्च सन्ति ।

**संस्कृतकविताः यथा-**

1. मातृभूमिविलापः - अस्यां कवितायां अष्टसंख्यकाश्श्लोकास्सन्ति ।
2. रूधिरतनये जागृहि- अस्यां कवितायां द्वादशश्लोकास्सन्ति ।
3. त्वमिन्दिरेशोणित वक्षसागता -अस्यां कवितायां षड्श्लोकास्सन्ति ।
4. रूधिरतनया इन्दिरा च- अस्यां कवितायां त्रिसंख्यकाः श्लोकास्सन्ति ।

**शान्तिदूतस्मरणिका-**

काव्यमिदं स्वाधीनभारतस्य प्रथमप्रधानमन्त्रिणः जवाहरलालनेहरू महोदयस्य मृत्युमाधारीकृत्यं विरचितम् । काव्यस्यास्य मुखबन्धः तदानीतन्तेन प्रधानमन्त्रिणा श्री लालबहादुरशास्त्रिणा लिखितमस्ति । काव्येऽस्मिन् षट्संख्यकाः कवितास्सन्ति । यथा-

1. हे देवदूत जवाहर ।
2. मातृभूमिविलाप ।
3. जयतु जवाहरलाल ।
4. चिरसंयत हे ।
5. सुधामयं ते विजययानं भवेत् ।
6. हे शान्तिदूत ।

**वन्देभारतम्-**

काव्येऽस्मिन् राष्ट्रियप्रेमपरिपूर्णाः पञ्चविंशति कवितास्सन्ति । काव्यस्यास्य मुखबन्ध डा .बलरामझाकड़महोदयेन जे.बी . पटनायकमहोदयेन च लिखितमस्ति । कवितानां शीर्षका- :

1. वन्दे भारतमातरम् ।
2. विलसति नूतनहर्षः ।
3. वन्दे जननी पालिनिम् ।
4. मधुरं भारतगानम् ।

5. मोहनमूर्ति वन्दे।
6. आह्वानम्।
7. जाग्रहि परिजाग्रहि।
8. जाग्रहि केशरीशावः।
9. जाग्रहि युवकुलः।
10. देहिललाटे चन्दनबिन्दुम्।
11. धन्याः जननि धन्याः।
12. जय भारतम्।
13. पूर्वभाले मुक्तिसूर्यः।
14. भारतगानम्।
15. सेयं भारतमाता।
16. जय जय भारतदेश।
17. वन्देभारतम्।
18. भारतवर्ष वन्दे।
19. देहि देहि रक्तविन्दुमिन्दुकल्प सेवक !
20. मातृवन्दनम्।
21. जय मम साधनसरणि।
22. भारत युवकुल याहि।
23. शस्यमयीं वन्दे।
24. जागृहि नियतम्।
25. स्मरमधुरभारतम्।

**राधामोहन-वीणा-**

श्री राधामोहनगडनायकस्य द्वयाशीतिः जन्मदिवमभिलक्ष्यः काव्यमिदं विरचितम्। श्री राधामोहनगडनायको एको उत्कलीय प्रसिद्धकविरस्ति।

**उत्कल-गौरवम्-**

1994 तमे वर्षेऽखिलभारतीयवाचस्पतिसम्मेलनम् उत्कलप्रदेशस्य राजधान्यां भुवनेश्वरे सम्पन्नमभवत् । तं सम्मेलनमभिलक्ष्यं काव्यमिदं विरचितम्।

**शताब्दि-पुरुष-भक्तिसुमनम्-**

1996 तमे वर्षे डा .राधानाथरथस्य शतं जन्मदिवसमभिलक्ष्यं काव्यमिदं विरचितम् । डा .राधानाथरथः एको सम्वादको आसीत् । पण्डितप्रबोधकुमारमिश्रेण पुस्तकमिदं तस्य जन्मोत्सवस्य दिवसे प्रदत्तम् । काव्येऽस्मिन् त्रिविंशति संख्यकाश्श्लोकास्सन्ति। अत्रत्याः श्लोकाः यथा रमणीयस्तथामनोहराश्च।

**आनन्द-सन्धानम्-**

डा .हरेकृष्णमहताबमहोदयेन उत्कलभाषया विरचित 'आनन्दसन्धानम्' इत्यस्य काव्यस्य संस्कृतभाषायामनुवादः काव्येऽस्मिन् विहितम् । डा .हरेकृष्णमहताबमहोदय 'उत्कल-केसरी' इति नाम्ना प्रसिद्धमासीत् ।

**बन्दिनः स्वदेशचिन्ताः-**

दिवङ्गतोत्कलमणिना पण्डितगोपबन्धुदासेन उत्कलभाषया विरचितस्य 'बन्दिर स्वदेशचिन्ता' इत्याख्यस्य प्रसिद्धकाव्यस्य संस्कृतभाषायामनुवादः काव्येऽस्मिन् कृतम् । पण्डितगोपबन्धुदासमहोदयः एको राष्ट्रियनेताः स्वतन्त्रतायाः नायकश्चासीत् । काव्येऽस्मिन् गोपबन्धुना विरचितसूक्तयः अत्र प्रयत्नेन संरक्षितास्सन्ति ।

**अर्द्धनारीश्वरः -**

कविरत्न श्रीमतीमनोरमामोहापात्रेण उत्कलभाषया विरचितस्य 'अर्धनारीश्वर' इत्यस्य काव्यस्य संस्कृतभाषायामनुवादः काव्येऽस्मिन् विहितम् ।

एताभिः रचनाभिः सह दक्षिणीकालिका-स्तुतिः, श्रीलङ्केश्वरमहिम्नगीतिः, शुनयदूतमादय बहुनि संस्कृतकाव्यानि पण्डितप्रबोधकुमारमिश्रेण विरचितानि सन्ति ।

**उपसंहारः -**

एवं प्रकारेण पण्डितप्रबोधकुमारमिश्रस्य समय -जन्मस्थान -रचनादीनां वर्णनं प्रस्तूयते मया । संस्कृतवाङ्मये तेन विरचितानां ग्रन्थानां महत्वपूर्ण स्थानं वर्तते । कवेः कवित्वं प्रतिभया ज्ञायते यत् कविरयं बहुमुखप्रतिभायाः धनिकोऽस्ति । पण्डितप्रबोधकुमारमिश्रः सामाजिक-राजनैतिक-जातीयतावादी वातावरणेन प्रभावितो दृश्यते । मलयदूत - रक्तझङ्कार - प्रज्ञादूताख्येषु दूतकाव्येषु राष्ट्रियभावनायाः उद्गारो सम्यक्तयाऽवलोक्यते । वर्तमानदेशे प्रचलित मानवमूल्यबोधस्यहानि - भ्रष्टाचारेत्यादीनां विषये कविनामाक्रोशः दृश्यते तेषु काव्येषु । एवं प्रकारेण पण्डितप्रबोधकुमारमिश्रः संस्कृतभाषया उत्कलभाषया च बहूनि पुस्तकानि विरच्यं संस्कृतवाङ्मयं सुसमृद्धं कृतमस्ति ।

**सन्दर्भग्रन्थसूची -**

1.अब्ददूतम्, भगवानपण्डा ओडिसा, डायरेक्टर ऑफ ट्यूरिज्म एण्ड कल्चर अफेयर्स (भुवनेश्वर)1980

2.प्रज्ञादूतम्, पंप्रबोधकुमारमिश्रः ., ओडिसा बुक स्टोर विनोद बिहारी कटक, 1994

3.प्रियदर्शिनी इन्दिरा, प्रबोधकुमारमिश्रः, गंगाधरत्रिपाठी, विनोदबिहारी कटक, 1984

4.मलयदूतम्, पंप्रबोधकुमारमिश्रः ., एस, वीपब्लिकेशन विनोद बिहारी कटक ., 1985

5.मानससन्देशः, दिगम्बरमहामात्रः, केशवमुद्रणालय खजुरी वाराणसी, 1988

6.रक्तझङ्कारम्, पंप्रबोधकुमारमिश्रः ., विद्यापुरी वालु बाजार कटक, 1990

7.बन्दिनः स्वदेशचिन्ता, पंप्रबोधकुमारमिश्रः ., कलिङ्ग स्टुडेन्ट्स स्टोर वालुबाजार कटक, 1988

8.वन्देमातरम्, पंप्रबोधकुमारमिश्रः ., विद्यापुरी वालुवाजार कटक, उड़िसा, 1987

9.शताब्दीपुरूषभक्तिसुमनम्, पं. प्रबोधकुमारमिश्रः, विद्यापुरीवालुवाजार-, कटक, 1994

10.शान्तिदूतस्मरणिका, पंप्रबोधकुमारमिश्रः ., शकुन्तलामिश्र, सरपडा शारदासदनम्, खण्डसाही, कटक, 1964

11. स्मृतिदूतम् प्रबोधकुमारमिश्रः .पं-, विद्यापुरी वालुबाजार, कटक, उडिसा, 1994

12. स्वप्नदूतम्, पंप्रबोधकुमारमिश्रः ., एसपब्लिकेशन .बी ., विनोद बिहारी कटक, उडिसा, 1974

13. दूतकाव्यग्रन्थावली, पंबसन्तपब्लिकेशन-प्रबोदकुमारमिश्रः ., डगरपडाकटक-, उडिसा, 2008

14. हंससंदेशः, एसलंगरः .एन ., वीरामास्वामी ., शास्त्रूलू एण्ड सन्स, मद्रास, 1955

15. Modern Researches in Sanskrit - Veermani Prasad Upadhyaya Felicitation Vol. Part One- Satyadeva Mishra, Indira, Prakashan, Patna, 1987

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

# अनूदितसंस्कृतसाहित्ये आचार्यभागीरथिनन्दमहोदयस्य योगदानम्

पूर्णमासी देवी, अध्यक्षा,
कृष्णप्रियादेवीमहिलामहाविद्यालयः,दशपल्ला

सारस्वतसाधनपरम्परावाहिनि संसारेऽस्मिन् अनुवादकलालंकृता कवेर्भारती महत्सौष्ठवं बिभर्ति। कविभारतीयं बहुप्रसरणगुणान्विता विद्वज्जनहृदयकन्दराधिष्ठिता सती विश्ववासीनां प्रसङ्गे न केवलं प्रेरणादायिनी, अपि च विश्वशान्तिस्थापने अग्रणीं भूमिकामधिगृह्णाति। कलकलनिनादिनी सुरस्रोतप्रस्रविणी मधुमन्दाकिनी पतितपावनी जगज्जननी भगवती जाह्नवी जातिधर्मवर्णनिर्विशेषतया सर्वेषां पितृतर्पणादिभिः कार्यैः यथैवं पापविनाशनं करोति, सुखसमृद्धिं प्रददाति च, अनुवादकलाकवलिता नवनवोन्मेषशालिनी कारयित्री प्रतिभा तथैव विश्ववासीनां समीपे ओडिआ-वङ्गला-तेलगु-कन्नडा-मालायालाम-हिन्दी-संस्कृत-इंराजी-फ्रेञ्च-इटाली-जर्मनीप्रभृतिभाषाविरचितग्रन्थानां परिचयं प्रददाति, विविधस्थानविशेषाणां संस्कृतिं ज्ञापयति च। अपि च काव्यतत्त्वमुख्यरसतत्त्वं विश्ववासिभ्यः परिवेशयति। अनेन उत्कलीयाः वङ्गसाहित्यामृतं, वङ्गीया अपि उत्कलीयसाहित्यामृतम् एवमेव क्रमेण परस्परयोः साहित्यामृतं सर्वे रसपिपासुनः साहित्यिकाः सेवन्ते। अतएव सकलभाषावद्धसाहित्ये जनानां प्रवेशः सुकरो भवति, फलतः विश्वसंहतिस्थापनाय इयं महती रज्जुः वर्त्तते। जगतीकरणकालेऽस्मिन् उत्कलभाषासाहित्यस्य विश्वव्यापिप्रचाराय संस्कृतभाषया भाषान्तरीकरणे ग्रन्थलेखकाः प्रयत्नशीलाः सञ्जाताः। सन्दर्भेऽस्मिन् उत्कलभाषासाहित्यस्य विश्वव्यापिप्रचाराय संस्कृतभाषया अनुवादकरणे आचार्यहरेकृष्णशतपथी, आचार्यवनमालिविश्वालः, आचार्यसुकान्तकुमारसेनापतिः, डा.क्षीरोदचन्द्रदाशः, डा.हरेकृष्णमेहेरः, डा.व्रजसुन्दरमिश्रः, डा.कृष्णकेशवषडङ्गी, डा.नारायणदाशः, डा.उमाकान्तपण्डा, डा.प्रमोदिनीपण्डा, डा.परम्बाश्रीयोगमाया, पण्डितगदाधरदाशप्रभृतयः उत्कलीयविद्वांसः प्रयत्नं कुर्वन्ति। अनेनैव उत्कलमणिगोपबन्धुदाशस्य धर्मपदम्, गङ्गाधरमेहेरस्य तपस्विनीकाव्यम्, राधानाथरायस्य चन्द्रभागा, गोदावरीशमिश्रस्य कालीजाई, सच्चिदानन्दराउतरायस्य वाजिराउतम्, गोकुलानन्दमहापात्रस्य चन्द्रर मृत्यु (मृत्युः चन्द्रमसः), नीलकण्ठदाशस्य कोणार्क, फकिरमोहनसेनापतेः सुनावोहू-इत्यादयः बहवः उत्कलसाहित्यग्रन्थाः संस्कृते अनूद्य विश्वसंस्कृतवाङ्मये रत्नत्वेन राजन्ते। एवमेव समग्रेऽस्मिन् भारतवर्षे सफलानुवादकर्त्तृरूपेण आचार्यभागीरथिनन्दोऽपि सर्वत्र परिचित इति तस्यानुवादग्रन्थानां परिशीलनात् प्रतीयते। महोदयरेष उत्कलभाषासाहित्ये प्रसिद्धानां ज्ञानपीठपुरस्कारभाजां श्रीमतां सीताकान्तमहापात्राणां, प्रतिभारायमहोदयानां तथा गुरुवर्याणां चन्द्रभानुशतपथिमहाभागानाञ्च ग्रन्थान् संस्कृतभाषयाऽनूद्य केन्द्रसाहित्याकादेमीप्रभृतिपुरस्कारैः पुरस्कृतो वर्त्तते।

अनूदितग्रन्थेषु तेषु *"याज्ञसेनी"* इति प्रथमानुवादोपन्यासः डा.प्रतिभारायमहोदयया मूलतः प्रणीतः, गुरुप्रसन्नमुद्राक्षरशालायां १९८५खीष्टाब्दे च मुद्रापित आसीत्। संस्कृतानुवादस्वरूपग्रन्थोऽयं विजयनगरे अमरमुद्रणालये २००६खीष्टाब्दे मुद्रापित आसीत्। अयमेकः पत्ररूपोपन्यासः ग्रन्थः, अतएवात्र सूचीपत्रं नास्ति। तत्र प्रथमभागे "समाप्तिः"[१] इति पदात् आरभते। पुनस्तत्र

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

पञ्चपञ्चाशत्तम(५५)विभागस्यान्ते "आरम्भः" [२] इति पदात् समाप्यते। आरम्भे "समाप्तिः" ततः "इति" अन्तिमे च "आरम्भः" एवमेव शब्दानां प्रयोगस्य तात्पर्यमिदं यत्, पत्रमिदमुल्लिख्य पुनः पठितुं कृष्णायाः प्रयासः भवति। अन्तिमसमये यावज्जीवनं न त्यजति, तावदिदं पठनं प्रचलिष्यति। स्वलिखितं पत्रमिदं तस्याः मृत्युमार्गसहचरं भविष्यति। "समाप्तिः"इति पदानन्तरम् "इति तव प्रियसखी" [३] उल्लिख्यते। सखी इत्युक्त्या द्रोपदी कृष्णा याज्ञसेनी वा अवबुध्यते। सखा इति शब्देन कृष्णः अवगम्यते, यतो हि श्रीकृष्णं प्रति द्रौपद्याः आत्मनिवेदनमिदम् उपन्यासस्यास्य सारतत्त्वम्। महापुरुषः कृष्ण एवात्र नायकः। कृष्णा तु नायिका। कृष्णाकृष्णयोर्मध्ये सखी सखा चेति आध्यात्मिकसम्बन्धः यः खलु देहातीतप्रेमसम्बन्धः अत्रावलोक्यते। महाभारतीयकथामनुसृत्य काले काले नारीजीवनस्य सकला समस्या, समस्ताश्चान्तर्वेदनाः द्रौपदीमुखेन उपन्यासेऽस्मिन् उपस्थापिताः। दिङ्मात्रमुदाह्रियते तत्र मेरुगिरेः हिमालयस्य स्वर्णरेणुषु स्खलितपदायाः स्वर्गलाभात् वञ्चितायाः कृष्णायाः अत्यन्तनिस्सहतया आत्मसम्वेदनं यथा–

*निर्बोधशिशवे क्रीडनकं प्रदाय परस्मिन् क्षणे तस्माद् बलादाकृष्य हरणस्येव सर्वं दत्त्वा सर्वापहरणस्य कथमिदं प्रहसनम्। यो हस्तौ प्रसार्य याचते, तं प्रसारयितुमुचितम्। परन्तु यः किमपि न याचते, तस्मै प्रतारणमिदं नैष्ठुर्यातिरिक्तं किमन्यात् स्यात्।* [४]

एवमेव विविधवर्णनासु ज्ञायते यत् समग्रविश्वस्य विदुषां संस्कृतपाठकानां मानसोल्लासाय हृदये नारीसम्मानजागरणार्थञ्च अस्यानुवादपरम्परायाम् आचार्यनन्दमहोदयेन महता प्रयासेन संस्कृतभाषया ग्रन्थोऽयमनुवादः कृतः।

आचार्यनन्दस्य द्वितीयः *"सृष्टितत्त्वानुचिन्तनम्"* इत्यनुवादग्रन्थः २०१० ई.वर्षे प्रकाशितः। श्रीमता गुरुदेवेन चन्द्रभानुशतपथिमहोदयेन "गोप्यरु अगोप्य" इत्युत्कलभाषया चतुर्दशाक्षरीति छन्दसा ग्रन्थोऽयं मूलतो विरचितः। अनुवादकेन तु अनुष्टुप्छन्दसाऽनूदितो वर्त्तते। विषयविभाजने आहत्य चतुस्त्रिंशत् अध्यायाः विलसन्ति, येषु अनन्तपुरुषः, हिरण्यगर्भः, शून्यब्रह्मतत्त्वम्, विश्वमहायज्ञः, आदितत्त्वम्, आकाशगङ्गा, प्रलयतत्त्वम्, सूत्रधारः, नवसृष्टिः, पञ्चकृत्यम्, आदित्यतत्त्वम्, गणपतितत्त्वम्, कलातत्त्वम्, रुद्रतत्त्वम्, सप्तकिरणात्मकं जगत्, सप्तात्मकं जगत्, प्राणतत्त्वम्, अखण्डमण्डलाकाररूपम्, स्वरतत्त्वम्, महातत्त्वम्, महाशक्तिः, मातृकागणः अथवा वर्णमाला, नादतत्त्वम्, सृष्टिकालविज्ञानम्, कालतत्त्वम्, ऋषितत्त्वम् अथवा देवतातत्त्वम्, सोमतत्त्वम्, प्रतीकब्रह्म, नारायणतत्त्वम्, नारदतत्त्वम्, अवतारतत्त्वम्, गुरुतत्त्वम्, पुरुषकारः, अन्तिमप्रार्थना चेति चतुस्त्रिंशदध्यायेषु विविधाः विषयाः समावेशिताः सन्ति।

चतुस्त्रिंशोऽध्यायाध्यात्मिकग्रन्थोयं न केवलं साईभक्तानां कृते, अपि तु साधारणजनानां हृदयकन्दरे भक्तिभावप्रवाहे मधुमन्दाकिनीव भाति। अत्र न केवलम् आध्यात्मिकविषयाः, अपितु दर्शन-विज्ञान-ज्यौतिषसिद्धान्तानां समाहारः दृश्यते। ग्रन्थेऽस्मिन् सृष्टितत्त्वत आरभ्य भारतीयदर्शन-धर्म-विज्ञान-ज्यौतिषशास्त्रदिविभिन्नानां विषयाणाम्, अपि च सृष्टिकालविज्ञानस्य क्रमे ऋषितत्त्व-देवतातत्त्व-प्रतीकब्रह्मतत्त्व-नारायणतत्त्व-गुरुतत्त्व-अवतारतत्त्व-मित्यादीनां विषयाणाम् उपस्थापनं मार्मिकभङ्ग्या प्रतिपादितमस्ति।

समग्रस्य जीवनगतोऽनेकमौलिकप्रश्नानां समाधानमत्र साधितं दृश्यते। प्रत्यध्यायं चान्ते सर्वकारणकारणस्य गुरुरूपस्य भगवतः प्रार्थनायोजनया, प्रार्थनायाः स्तुतिरूपत्वात्, स्तुतेश्च भगवद्विषयकरत्युपाधिकत्वाच्च साहित्यरसिका अप्यत्र भावध्वनिप्रधानकवितासु आत्मानमुन्मुखीकर्त्तुमर्हन्ति। वैज्ञानिकाः भविष्यत्कालिकाः, ज्योतिषशास्त्रसम्मताः वर्तमानकालस्य दिशा, सांख्यशास्त्रस्य विषयाश्च चर्चितायै ग्रन्थोऽयमखिलविश्वस्य मूलस्त्रोतरूपेण सर्वेषां विद्यमानानां तत्त्वानमाकरः मे प्रतिभाति। प्राचीनपरम्पराऽऽधारेण छन्दोशास्त्रनियमाधारेण च बद्धोऽयं प्रबन्धः आधुनिकसारस्वतसाधकानां मार्गदर्शकः स्यादिति मे विश्वासः।

ततः पद्मविभूषणेन डा.सीताकान्तमहापात्रमहोदयेन उत्कलभाषया पारम्परिकवृत्तरहितः नवसर्गैः लिखितो *"भारतवर्षम्"* इति आचार्यनन्दमहाभागस्यास्य तृतीयानुवादग्रन्थः २०१०सम्वत्सरे राष्ट्रियसंस्कृतसंस्थानेन प्रकाशितः। पुस्तकेऽस्मिन् सम्पूर्णकाव्यम् उत्कलभाषासंस्कृत-भाषाभ्यां च प्रतिपूर्वपरपृष्ठं युगपत् समानमात्रया सन्निहितमस्ति। काव्येऽत्र सांस्कृतिकविभवाः निरूपिताः वर्त्तन्ते। कविरयम् आवाल्यात् स्वीयं भारतदेशं, भारतीयां संस्कृतिं, भारतीयां पीडां च दर्शं दर्शं मनस्तत्त्वविवलितदृशा स्वदेशस्यामृतमर्त्त्यतां सम्पाद्य सहृदयमनः आकर्षति, देशात्मबोधबीजञ्चाङ्कुरयति। तत्र दिङ्मात्रमुदाहरणत्वेन नवसर्गात्मककाव्यस्यास्य द्वितीयसर्गे वर्णनानुसारं सम्प्रति मनुष्यं मनुष्यञ्चान्तरा कोऽपि सुसम्पकः नास्ति। सर्वे रक्तपाताय हत्यार्थञ्च निमज्जिताः भवन्ति। अतः त्रयस्त्रिंशत्कोटिसंख्यकाः देवाः शान्ता भवन्ति। उक्तञ्च कविना–

*त्रयस्त्रिंशत्कोटिसंख्याकास्त्रिदशाः शान्ताः / मानवस्यार्त्तियाञ्चानुरोधानां / श्रवणं तु दूरे /*
*प्रायेणाद्य नेत्रेष्वावरणं, न किमपि दृश्यते /कर्णश्च रुग्णाः, न किमपि श्रूयते।। /*
*तथापि निर्देशः पितृपुरुषाणां / चरैवेति चरैवेति /क्लान्तिहीनयात्रेव सुदूराकाशे।।*[5]

एवमेव परम्पराऽऽधुनिकते, अतीतस्मृतिभाविस्वप्नौ चैकीकृत्य वास्तवविकल्पस्य सर्जनायां कवेरत्र निरन्तरमभिनिवेशः विद्यते। अस्य कविताः क्लेशकल्मषादीनां मध्ये मानवस्थितेः गभीरतमस्यानन्दस्य अनुसन्धानं प्रददत्ति। सहृदयानां समक्षं प्रस्तुतोऽयं काव्यग्रन्थः अस्माकं भारतदेशमाधारीकृत्य पुरापुरोऽवलोकनाभ्यां समाहृत्य किमपि सांस्कृतिकं रूपं निरूपयति। मानवसभ्यताया इयं भारतभूमिः अनादिः अनन्ता च। सा असत्यपि काले काले अभवत् भविष्यति च। भूतत्त्वपुरातत्त्वेतिहासादीन् अतिक्रम्य इदानीन्तनकाले अस्माभिः सह सङ्गता सा अस्मास्वपि स्थास्यति। संस्कृत्यपरपर्याया सैषा नानाभूततत्त्वैः निरन्तरं चरैवेति चरैवेति आवाहयति। एषा संस्कृतिः महानन्द-महादुःखे, सामगान-रेरेकारौ, स्वेच्छाप्राणत्यागाऽ-नाहाहारमृत्यू, मानससरोवर-लघुकुल्ये, पञ्चतारकाऽऽवासभग्नजीर्णकुटीरे, यमनचिकेतारौ, समादर-लाञ्छने च उररीकृत्य सञ्जीविता भवति। एतेषां सर्वेषां समवायेन स्मृतौ वास्तविकस्य सामाजिकानन्दस्य उद्रेक इति कवेरस्य कवितायाः विशेषः भवति। वास्तवतः काव्यमिदं भारतवर्षस्य वैभवं व्यनक्ति।

आचार्यनन्दस्य चतुर्थानुवादग्रन्थः *"उल्लंघनम्"* २०१५सम्वत्सरे नवदेहलीस्थसाहित्याकादेमीद्वारा मुद्राप्य प्रकाशितः। तत्र डा.प्रतिभारायमहोदयया उल्लङ्घनम् इति गल्पमग्रे उपस्थाप्य एण्टिक्, गान्धी उवाच, निरुत्तरः, रुद्धावतारः, पादुकापूजा, व्याघ्रः, घुणः,

भोजनोत्सवः, दुहिता, कपटद्यूतम्, तात्त्विकः, अनामधेयः, भगिनीभागः, मानरक्षा, केतकीजीवनम्, पादुकायुगलम्, अमृतनैवेद्यम्, निजसङ्केतः, अनुक्तं वृत्तम्, मातृविभाजनम् चेति शीर्षकैः एकविंशतिगल्पैः उत्कलभाषया आद्याप्रकाशनीकटकप्रकाशनसंस्थाद्वारा १९९८सम्वत्सरे च ग्रन्थोऽयं प्रकाशितः। अत्र विविधचरित्राणां कथामाध्यमैः समाजस्य कृते दिग्दर्शनं प्रदानं भवति। दिङ्मात्रमुदाह्रियते तत्र व्याघ्रः इति सप्तपुटसम्वलितायां कथायां प्रतिपाद्यते यत् कथं प्रभुः सेवककन्यायाः उपरि अत्याचारं कृत्वा तां हत्वापि न्यायालयात् प्रमाणाभावात् मुक्तो भवति। एवमेव धनधान्याद्युत्कोचेन अग्रिमं प्रतिभूं प्राप्य आरक्षिकिभिः शृङ्खलाबद्धोऽपि न अभवत्। परन्तु सेवकः स्वप्रभोः कन्यायाः धर्षणं न कृतवान्। केवलं तस्याः बलात्काराय उद्यममाचरितवान्। तदर्थं कारावासं स्वीकरोति, पुनश्च ग्रामीणानां प्रस्तराघातैः स आघातो भवति। यदा मनुष्यो निष्ठुरो सन् किमपि कार्यं करोति, तदा तस्मै अत्र व्याघ्रस्य प्रतीकं सम्यक् व्यवह्रियते। अपरञ्च व्याघ्रः मनुष्यं खादित्वा जीर्णं करोति, परन्तु कृतकव्याघ्रस्तु स्वयं म्रियते। सेवकस्य विषये प्रतिपाद्यते यथा–

*अगण्यस्य मानुष्यं शनैः शनैर्लोपं याति। तस्य हस्तचरणा व्याघ्रस्यैवावस्थान्तरिताः। तस्यापि दन्ता नखाश्चाङ्कुरिताः। सम्प्रति स पूर्णतो वन्यः शार्दूलः। मीननयनाभ्यामगण्यो व्याघ्रमुखो दृश्यते। किन्तु अगण्ये वर्तमानो मनुष्यः स्वदेहं सहसा त्यक्तुं न प्रस्तुतः।*[६]

पुनश्च– *परन्तु ग्रामप्रवेशे तदुपरि लोष्टवृष्टिरारब्धा। ग्रामे तथाभूतस्य पापकर्मणः स्थानमेव नास्ति। वास्तविकव्याघ्राः घ्नन्ति, मृषाव्याघ्रास्तु म्रियन्ते– इत्येव प्रकृतिनियमः। अगण्यः प्रकृतिनियममनुपालयन् तत्रैव मुद्रितनेत्रो निश्चिन्तः सुप्तः।*[७]

एवमेवात्र कथासंग्रहस्यास्य कथानां परिवेशः पार्वत्य–ग्राम्य–नागरिकसमाजजीवनञ्चेति भवति। पात्रचित्रणे सामाजिकमनोभूमेरन्तस्थलं प्रविश्य तद्गतचित्तकल्पान् लेखिकेयमनुसन्दधाति। उत्कलीयसंस्कृतिं विश्वसंस्कृतिप्रचाराय संस्कृतभाषया कथासंग्रहोऽयमनूद्यते। अत्र सामाजिकजीवनस्य समस्याऽन्तर्द्वन्द्वमनोविज्ञानानां पटवयनं भवति।

ओतत्रैकोनविंशाऽध्यायात्मकसंस्कृतानुवादस्वरूपः महोदयस्यास्य पञ्चमानुवादग्रन्थः *"श्रीगुरुभागवतम्"* इति २०१६सम्वत्सरे विजन्सप्रिण्टर्स–एण्ड–पब्लिशर्स–इति प्रकाशनसंस्थया प्रकाशितः। श्रीमता गुरुदेवेन चन्द्रभानुशतपथिमहोदयेन मूलतः ओडिभाषया विरचितस्य "श्रीगुरु भागवत" इति ग्रन्थस्य प्रथमखण्डस्य संस्कृतानुवादरूपम्। गुरुः हि स्वयं भगवान्निति मूलतत्त्वमुपस्थाप्य नवाक्षरच्छन्दसा विरचितमिदं गुरुभावतम् अनुवादकेन अनुष्टुप्छन्दसा अनूद्यते। ग्रन्थेऽस्मिन् वर्ण्यते यत् श्रीगुरोः शक्तिपातेन शिष्ये शक्तिः जायते। दीक्षायाः मूलमन्त्रस्तु गुरवे समर्पणम्। ग्रन्थेऽस्मिन् गुरुतत्त्वस्य गहनविवेचनं वर्त्तते, यत् किल विश्वेऽस्मिन् गुरुमार्गानुयायिनां ज्ञानलाभाय प्रकाशस्तम्भस्वरूपमेव। वास्तवतः ग्रन्थोऽयं गुरुपरम्परासाहित्यजगति रत्नायमानः परिशोभते।

अनूदितग्रन्थान्नेतान् विहाय मौलिकग्रन्थद्वयात् शतककाव्यमेकं *"श्रीगुरुभक्तिकुसुमाञ्जलि–शतकम्"* इति आचार्यनन्दमहोदयेन प्रणीतम्। काव्यमिदं उपमा–रूपक–अर्थान्तरन्यास–समासोक्ति–निदर्शना–विभावना–विशेषोक्ति–अनुप्रास–श्लेषादिभिरमलङ्कारैरलंकृतम्, अनुष्टुप्छन्दसा च विरचितम्। शतककाव्येऽस्मिन् चतुरधिकमेकशतं श्लोकाः सन्ति। २०१६वर्षे काव्यमेतत् प्रकाशितम्। महोदयेनानेन

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

*"तस्मिन् दिने"* इति चतुर्दशानां लघुकथानां संग्रहः अपरैको मौलिकग्रन्थः विरच्यते। २०२०सम्वत्सरे च कथासंग्रहोऽयं प्रकाशितः। किञ्च आचार्यनन्दमहाभागेन *साहित्यरत्नाकरमीमांसा* इति काव्यशास्त्रीयसमीक्षाग्रन्थः, *प्रतिभासंस्कृतमार्गदर्शिका* (६संस्करणेषु), *विमलासंस्कृतमार्गदर्शिका, बृहत्त्रयीपरिशीलनम्, A Sanskrit Foundation of Indian Management Ethics* चेत्यादयः विविधाः ग्रन्थाः छात्राणां परीक्षोपयोगाय, ज्ञानपिपासूनां ज्ञानविकाशाय, विदुषां मोदाय च लिख्यन्ते। अपि च सरलं संस्कृतम्, सरसं सस्कृतम्, सफलं संस्कृतम्, सकलं संस्कृतम् इति पञ्चमकक्षातः अष्टमकक्षापर्यन्तं पाठ्यक्रमपुस्तकानि लिखितानि। शताधिकसंख्याकाः शोधलेखाः, कविताः, कथाश्च विविधपत्रपत्रिकासु प्रकाश्यन्ते।

**पादटिप्पणी-**

१.याज्ञसेनी-पृ.१।

२.याज्ञसेनी-पृ.४६७।

३.याज्ञसेनी-पृ.१।

४.याज्ञसेनी-पृ.२।

५.भारतवर्षम्-पृ.३५।

६.उल्लघनम्-पृ.८६।

७.उल्लघनम्-पृ.८८।

**ग्रन्थसूची-**


| क्र.सं. | ग्रन्थनाम | प्रणेता/ व्याख्याता | प्रकाशकः | सम्बत्सरः |
|---|---|---|---|---|
| १. | उलंघनम्(अनुवादः) | आचार्यभागिरथीनन्दः | दिल्ली-संस्कृतैकादेमी | २०१५ |
| २. | भारतवर्षम्(अनुवादः) | आचार्यभागिरथीनन्दः | राष्ट्रियसंस्कृतसंस्थानम् | २०१० |
| ३. | याज्ञसेनी(अनु) | आचार्यभागिरथीनन्दः | राष्ट्रियसंस्कृतसंस्थानम् | २००६ |
| ४. | श्रीगुरुभागवतम्(अनुवादः) | आचार्यभागिरथीनन्दः | विजन्स प्रिण्टर्स पब्लिशर्स | २०१६ |
| ५. | सृष्टितत्त्वानुचिन्तनम्(अनु.) | आचार्यभागिरथीनन्दः | विजन्स प्रिण्टर्स पब्लिशर्स | २०१० |
| ६. | तस्मिन् दिने | आचार्यभागिरथीनन्दः | अमरग्रन्थ पब्लिकेशन्स | २०२० |
| ७. | श्रीगुरुभक्तिकुसुमाञ्जलिशतकम् | आचार्यभागिरथीनन्दः | अमरग्रन्थ पब्लिकेशन्स | २०१६ |

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

# Social Conditions as Depicted by some Modern Sanskrit Poets of Odisha

Mamata Pradhan
Ph.D. Research Scholar
P.G. Department of Sanskrit
Utkal University, Vani Vihar, Bhubaneswar

## 0. Introduction

At present times a large number of poets modern Orissa are composing small poems and longer *kāvya*s through Sanskrit language. They are Late Pandit Digambara Mohapatra, Dr. Prafulla Kumar Mishra, Dr. Braja Sundar Mishra, Dr. Parambashri Yogamaya.

Other poets who are writing in Sanskrit now are-

(1) Banamali Biswal, *Rituparṇā*,(2) Prafulla Kumar Mishra, *Brahmanābhiḥ*, (3) Ravindra Kumar Panda, *Pratidhvani*, (4) Keshava Ch. Dash, *Bibhāvari*, (5) Pramod Kumar Nayak, *Savari*, (6) Harekrishna Meher *Mātṛgitikānjaliḥ*, (7) Narayana Dash, *Hatyākāī kaḥ*, (8) Parambashree Yogamaya, *Mṛtyuḥ-Candrasyamaṣaḥ*.

## 1. Digambar Mohapatra

Pt. Digambar Mohapatra was born in the village Purunapani in Banki sub-division of Cuttack district. A Sanskrit teacher by profession, Mohapatra has got rare disnctions among modern writers in Sanskrit. A widely travelled personality visiting a good number of Western countries, the poet has extensive experience and profound knowledge in many branches of art of culture.

His *Mānasasandeśa* is *khaṇḍakāvya*, deals with 180 verses in Muktaka and Yugmaka verses in traditional metres like *Vaṁśastha*, *Viyoginī*, *Vasantatilaka* etc. Unlike *Meghaśandesa*, it has been divided into 15 sections and is based on the description of particular places and objects. Mohapatras mind-swan or *Mānasahaṁsa* is sent from Puri to Manas lake beyond the Himalayas. On the way comes Konark, Chilika-lake, Bihar state, prayag, Agra, Delhi, Kashmir (particularly Srinagar), the Kailasa Mountain etc. Here is this Mānasarovar lake, through the dialogue of the Mind-swan with his lady-love the wretched conditions of the country comes to the view of the readers. Here the poet seems to be touched at heart on observation of the decadence in social and moral life of man in present day India. The immortal public leader is narrated by Sri Mohapatra in the following way-

न्नास्त्यद्य पूतचरितो रघुनन्दनः स
राजाप्रजा हितकरो न च रामराज्यम् ।
राजायते स्वाहितनिष्ठपरोधुनाऽसौ
नेता हि केवलमिहैव शठो वरिष्ठः ।।

(*Mānasasandeśa,* 14.32, p.34)

On the other hand the common people are portrayed by Sri Mohapatra in the following fashion-

देवान् जना जनपदे न च मानयन्ते
देवस्वमप्युदरसाच्च समावहन्ते ।
गङ्गाजलं भवतु वा यमुनाजलं वा
किं तेन हन्त किमहेश्च पयः प्रपानैः ।

(*Mānasasandeśa* – 14.25, p. 35)

On the defect of democracy, the poet reiterates in his *Janatantravimarśa* (2002), where the rich goes on accumulating more riches and his servant remains poor for ever.

मन्ये हि दोषो गणतन्त्रे आस्ते
तन्यते वैषम्यमिदं च येन ।
धनी धनं सञ्चिनुतेऽतिमात्रं
निध्नस्तदा योऽस्ति सदैव दुस्थः ।।
(को विप्लवं वारयितुं समर्थ;) जनतन्त्र-विमर्शः p.37

Moreover,

गणतन्त्रनये नीतिनिराश्रयेव रोदिति ।
भेदवादरताः सन्ति नेतारो हि नयाद् वहिः ।
दुर्नीति राजते राज्ये सज्जनो दुर्जनायते ।
प्रपीड्यन्ते प्रजा दुःखाद् गणतन्त्रं न रक्षति ।

On Dutifulness the poets view stands high when he writes-

स्वधर्मरक्षां यदि नाचराम्यहं
कथं हि रक्षेत् खलु मां सोऽरक्षतिः
शरोमदीया यदि याति यातु वा
न नीतिमार्गात् विचलामि जातुचित् ।

(जनतन्त्र-विमर्शः p.11)

The poet has already drawn the appreciation of the critics and connoisseurs by the imprint of his matured artistic hand in about these more than two decades of poetic life.[1]

The poet has become more explicit on the corruption factor particularly regarding the leaders in democracy. For example-

यदि नो भारते भाति प्रकृष्टं गणतान्त्रिकम् ।
कथमत्र पुरे प्रान्ते भ्रष्टाचारः प्रवर्त्तते ।। *ibid*.p.26

The same context does not come to an end in this work here. The poet in a subsequent satirical *kāvya*, *Durnītipurānam* (2000) uses more weapons against the corruption in democracy. Regarding the self-aggrandising leaders the poet remarks.

लोकस्य नेता खलु सर्ववेत्ता ।
पृथक् पृथक् स्वान्तः वचोक्रियाभ्यः ।
स्वरुपमस्यैव महद्विचित्रं
देवो न जानाति कुतो मनुष्यः ?

It unveils the double standards, conceit and hypocrisy, changing, party lines off and on, do not indicate any commitment either for the motherland or the people those who elect them.

An alround picture of decadence in the society is portrayed in his भवते रोचते यथा (1996). It has become rare to find goodwill for one another. Selfishness has become the guiding factor of human behaviour for which the poet wails in agony in his poem विप्लबवरुणालये as -

न वासयोग्या खलु सागराम्वरा
न कश्च विश्वासबिमर्शभाजनम् ।
जनावने स्वादुवचोऽपि चेद् क्वचिद्
विषञ्च तेषां षृदये समुत्कटम् ।

Moreover,

विना शुभेछां श्वसता शरीरिणां
स्वजीवने स्वार्थमस्त्रमिच्चताम ।
भरेण तेषां हि विपद्यसे मही
शुभाय नैतत् खलु विश्ववासिनाम् ।
"विप्लवोवरुणालये" - (भवते सेचते यथा)- p.66

He is a poet so much rooted to the ground level reality, he has not even left out in his *Vyastarāgam* which can provide sufficient fun and amusement to the readers. For example-

वारिनास्ति वारिवाहे, जामाता भवति पलितः केशः, क्रन्दति कुमारी गृहे
पर्वते पर्वते घनः वेणुं वादयति नन्दनन्दनः, प्लवते राधिका मनः ।
हस स्मरराज हस । तरुणी हृदयमनुप्रविशः सदा मधुपुरे वस। p.50
काचः काचोमणिर्मणिः विदधाति यथा यदजयोनिः, वनंवनं वनी वनी ।। p.66

In one sentence we can summerise on the poet Digambar Mohapatra, that he was a natural poet

by instinct has not left any visible area of social life, may it be children literature, travelogue, polity in democracy, social decadence, patriotism, spirituality, philosophical contemplations, Yogic system, description of nature, love and romanticism, kaivisikṣā, wisesayings and so on.

## 2. Prafulla Kumar Mishra

Prafula Kumar Mishra taught Sanskrit literature and poetics in the P.G. Dept. of Sanskrit, Utkal Universiry, Bhubaneswar. He has four collections of Sanskrit poems entitled *Citrakuraṇgi* (1995), *Brahmanabhiḥ* (2000), *Tava-nilaye* (2000) and *Konarke* (2002) and small lyrical play *Citrangandā* (2005).

P.K. Mishra is a poet, deeply rooted to the soil of Orissa more so in the Puri-Konark region. The poet himself as certains-

ततो गव्युतिमात्र दुरे मदीयावासः । आवाल्यात् चक्रवाले छायाङ्किते कोणार्कस्य मन्दिर-मवलोक्य विस्मयेनाभिभूतो जातः ।

This has later induced the poet to produce the *Kāvya Koṇārka* which has given scope for the poets high imaginations. See in Koṇārke –

अपराह्णे प्रलम्बिते/
विद्यालयं बालेषु गतेषु
भजनं भोजनं च सम्पादिते,
द्वारि छन्दपद्यभ्यां
मध्ये लग्नेकहस्ता/
वामहस्तलग्नमुखं
कपाटोपरि प्रलम्वते ।

Here is a scene from Koṇārk temple carved in sand stone in the 13th century. The poet imagines her may be a devoted wife, after the children has gone to the school, having finished the fore-noon household lores looking for the way of the return of her dear husband. Or it may be otherwise, according to the poet she may be a Parakiya remembering the dalliances of her paramour in the past day when one reads it-

अथवा
गतदिवसे समागतस्य विटस्य
सुखकरं स्मरणं कुरुते ।

Or there may be further shift in the world of ideas. She may be a promiscuous woman not satisfied with her husband by her gestures and lusture attracting a promising passer by in her net of amorous desires. As the poet imagines-

अथवा
रतीश्वरी,
समागतस्य पुरुषस्य
मुखमवलोक्य
मृदु हसति
हसन्ती आकर्षयति
आकृष्य जाले पातयति
पातयित्वा मोहयति ।

Having a look at one model carved out in stone by artist before hundred years the poets imaginations in such a diversified manner, tells the depth of thinking of P.K. Mishra as a poet laudable insight.

Besides, free style in poetry versified composition in traditional metres are also not unknown to the poet in- “Timirah” he reiterates on the moon beaming face of his beloved in his collection *Brahmanabhi* in *Vasantatilaka* metre.

His philosophical contemplations identify the poets vibrations in an equilibrium with Lord Jagannath, which he sees as the very cause of the creation.

For the roaming and moving man in the modern age, most of the life is spent on wheels. For the more affluent even in the open sky in a closed AC aircraft amidst varieties of Co-passengers or inmates or inmates who knows whether any meeting with them shall be again in future or not. Still man starts the primary love game there if possible in- स्वप्नसन्तरणम्

उर्वशी या स्वर्गवेश्या नन्दनकानने
पुष्पान् पुष्पं देहान्देषमनुक्षणम् ।
पुरः व्योमपरिचारिणी सुरुपा युवती
इयं हि सा प्रणयिनी उर्वशी-सुन्दरी ।।

Then in the dream the poet becomes conscious. The society perhaps restricts him in his subconscious state, when we writes-

गृहाङ्गने प्रतीक्षिता
सोद्विग्ना स्वपत्नी
चिन्ताकुला शोचयति भर्तुरागमनम् ।

Then the poet comment in his consciousness-

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

वायुयात्रा अनिश्चिता जीवनस्य गतिरनिश्चिता ।
न जानाति को वा तत्र आनिश्चितं स्वप्नसन्तरणम् ।।

How people spending time and energy on trivial things best presented by the poet in - त्यजतांत्यजतां रथ्या p.24

व्यस्ततायाः रथे वसामि...। त्यजतां त्यजतां रथ्या...।
मत्कृक्कुरस्य मत्कृणाः प्रबम्ला ।आयास्यते च द्राकतरः ।
परश्च भविष्यति यस्य प्रदर्शनी ।शिरसि व्था मे कम्पजरः
त्यजतां त्यजतां...। शाल्याः ग्रामे कविसमवायः ।
विलम्विते यत् व्यस्टतशेऽस्मि ।त्यजतां त्यजतां...

The poem मुधा कलकलः is a representative expression of such pseudo businessly situation met with in *Citrakurangi* (pp. 41-42) the cuckoo has no important in this insouciant world as observes Aurn (*Op.cit*. A.R. Mishra,p.175).There is hardly any body to appreciate its songs. People otherwise busy find little difference in it whether the cuckoo sings or the ass brays-

न कोऽपि शृणोति न वा कथयति ।कोकिलो गायतु गर्जतु वा खरः ।नास्ति विशेषो न वा समादरः The Gresham's law of Economics has worked here as the poet thinks.

The social decadence of the present age has been reflected at many instances in modern Sanskrit poets/ authors writings. See, how P.K. Mishra depicts it through provoking metaphors and symbols. He finds man's greed is now dominating the houses and family life by relegating the finer aspects to oblivion-

गृद्धपश्री सदा गृहे मोदते ।खिन्नसारसो मानससरंगतः
(पतिवर्द्धितेप्रबञ्चना, चित्रकुरण्डी p.14)

The society today is gasping under brisk business which very often trivial, silly and super fluous. Man has no time to appreciate beauty or to meditate upon the nature and characters of self of the uncomparable grandeur of the creation of the Almighty God. Man has made himself a prisoner of his own ambitions small or big. Lost the peace of mind long far away, only busy for house (even construction of number of buildings here and there beginning from the National capital till the paternal or in laws village).

Prafulla Kumar Mishra's career as a poet is still open. Gradually the man grows more thought-provoking poems of larger and serious dimensions on life and society are well expected form the spectrum of his luminous pen.

**3. Dr. Braja Sundar Mishra**

Among younger generations of poets Braja Sundar Mishra (1968), the author of So *Śoṇitasvākṣaram* and *Candrabhāgā* well reveals promising future for socially oriented poets of Orissa.

## 4. Dr. Parambashree Yogamaya

Another young poet Parambashree Yogamaya[2] represent female poets of Odisha, whose 1st collection of poems are on the way of publication by Sarasvati, Bhadrak. The feelings of an unmarried young girl in the modern society is reflected here in her poem- नारी ।

यस्मिन् सा विश्वसिति,
स तां दंशति, शतधा विदारयति
सुरक्षाया: कैतवेन असहायति,
प्रवञ्चनाया विषावर्ते क्षिपति
शठत्वमाश्रयते ।

This feeling continues in the whole poem in different situations and with different characters. What is the cure? Will the writers poets be able to bring a change?

**End Notes**

1. For details see Panda Raghunath. *Orissa's Contribution in Sanskrit Lyrics*, Abhijeet Publishers, Delhi (2004) pp.213-215.

2. Arun Ranjan Mishra, *Contemporary Sanskrit writings of Orissa*, Pratibha Prakashan, Delhi, 200. pp. 67-97.

3. I am thankful to this young poetess for providing me some very important research materials.

**Bibliography**

1. Biswal, Banamali. Am aadmi ki zamir aur uski zamin, Drk-12 (Hindi) July-Dec-2004.
2. Mishra, Prafulla Kumar, *Citrakurangi*. The author, Bhubaneswar, 1995. 3.*Tavanilaye*, Swarna Prakasana, Bhubaneswar, 2000. 4. *Brahmanabhih*, Swarnaprkeashan, Bhubaneswar, 2000. 5.*Konarke*, Campus diversity programme, Utkal University, 2001.
6. Mohapatra, Digambar. *Durnitipurānam*, U.C. Mohapatra, Raurkela, 2000.7.
7. *Janatantra Vimrsah*,U.C. Mohapatra, Raurkela,2002.8.
8. *Manasasandesam*, U.C.M. Raurkela 1988.9.
9. Panda, Raghunath. *Orissa's Contribution in Sanskrit lyrics*, Abhijeet Publications, 2/46, Tukhmeerpur extensious, Delhi-94, 2004.10.
10. Panigrahi, Satish Chandra. Unpublished article, 'The poetry of Prafulla Mishra'.

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

# प्रज्ञादूते जगत्–स्वरूपम्

Snigdha Swarupa Barik
Lecturer in Sanskrit
Nimapada (Auto) College, Nimapada

**उपक्रमः –**

साम्प्रतिकसमये ये केचन धीमन्तः काव्यकाराः संस्कृतस्य सृजनात्मकक्षेत्रे निरन्तरं कर्मरताः दृश्यन्ते तेषु उत्कलप्रदेशस्य पण्डितपप्रबोकुमारमिश्रः भवति एकः कीर्त्तिमान् स्रष्टा। काव्य रचनाक्षेत्रे तस्य पाटवः विस्मयकारी प्रतिभाति। अतोऽसौ महान् कविः उत्कलस्य कालिदासः इति कथ्यते। सुभारत्याः उत्कलस्य वरपुत्रः पण्डितः प्रबोधकुमारमिश्रमहाभागाः अष्टसंख्यकानां दूतकाव्यानां लेखकभावेन महद् गौरवस्य स्थानमध्यारोहति। तेषु प्रज्ञादूतः प्राधान्यमर्हति। काव्यस्यास्य सौष्ठवमतीव रुचिरमस्ति। कविः साधोर्मुखेन प्रज्ञाशारिकायाः पुरतः सर्वं वर्णयति, एतान् सन्देशान् सर्वेषां कृते श्रावयितुं च तस्यै निर्दिशति। अतः काव्यमिदं प्रज्ञादूतमिति नाम धत्ते। काव्येऽस्मिन् कविः संसारस्य नश्वरतांचिरन्तनसुखलाभस्योपायादिकं च ,मानवस्य कर्त्तव्यं ,लोकानां दुराचारादिकं ,सांप्रतिकसमयस्य कुटीलतां , वर्णयति एवं च प्रकृतिपुरुषः, शिवशक्तिः, धर्मः, आत्मा, प्रणवः, सृष्टितत्वम् (जगत् स्वरूपम्), ब्रह्म, माया विषये वर्णयति। तस्य सर्वश्रेष्ठकृतित्वेन विवेचितं प्रज्ञादूते "ब्रह्म सत्यं,जगन्मिथ्या"इति तत्वं प्रतिपादितं दृश्यते।

कालिदासस्य मेघदूतवत् काव्यमिदमपि कश्चिदिति शब्दादारभ्यते। अस्य वर्णनानुसारेण कश्चिद् ब्रह्मलग्नः साधुरासीत्। एकदा स स्वप्रज्ञां सारिकाभावेन संबोध्य तस्याः पुरतः निजमनोव्यथां प्रकाशितवान्। संसारः कथं दुःखपूर्णः, सर्वे नराः कथं न्यायपथाद् विच्युता भवन्ति, सर्वत्र कथं दुर्नितिर्व्याप्नोतीति विषयाः साधुना वर्णिताः। ब्रह्मणः नित्यत्वं, जीवपरमात्मनोः संबधादिकमपि काव्येऽस्मिन् वर्णितमस्ति। काव्यस्यान्तिमेषु दशश्लोकेषु कवेर्विस्तृतः परिचयस्तस्य काव्यकृतयश्च वर्णिताः सन्ति। एवं प्रकारेण काव्यं समाप्यते।कविः काव्यस्रष्टा। प्रजापतिः ब्रह्मैव सः काव्यसंसारस्य सृष्टिं करोति तथैवं परिवर्त्तयति। अतः कथ्यते –

**“अपारे काव्यसंसारे कविरेव प्रजापतिः।**
**यथास्मै रोचते विश्वं तथेदं परिवर्तते ।।”**[1]

संस्कृतकाव्यानि मुख्यतः भागत्रयेण विभक्तानि सन्ति। तद्यथा गद्यम्, पद्यम्, मिश्रश्चेति। पद्यकाव्यं पुनश्च भागद्वयेन विभक्तम्। तद्यथा महाकाव्यं खण्डकाव्यश्चेति। महाकाव्यानां कृते आलंकारिकैः विस्तृतं वर्णनात्मकं च लक्षणं प्रदत्तम्। **“खण्डकाव्यं भवेत् काव्यस्येकादेशानुसारी च ।"**[2] संस्कृतस्य दूतकाव्यानि खंडकाव्यानामन्तर्गतानि एव। एतानि खंडकाव्यानि अपि गीतिकाव्यनाम्नाभिधीयन्ते।

## १.जगत्स्वरूपम् –

नामरूपात्मकजगतः सृष्टिः ईश्वरस्य अव्यक्तस्वरूपात् न तु व्यक्तस्वरूपात् भवति। जगतः उपादानं तथा च निमित्तं कारणं भवति परमात्मा। स्थावरजङ्गमादि सकलभूतानि तस्मात् उत्पद्यन्ते। सः अधिष्ठाता रूपेण अस्य जगतः निर्माणं परिपालनं संहारं च करोति। जगदिदं तस्यैव सनातनांशः। अज्ञानस्य विक्षेपशक्तिद्वारा अस्य क्षण–भङ्गुरसंसारस्य निर्माणं भवति। अत्र अज्ञानं नाम अविद्या, माया, अवस्तु वा। ब्रह्म वस्तु इति उच्यते। तद्भिन्नं सकलपदार्थं भवति अवस्तुः इति । इयं सृष्टिः विचित्रा इति कविः कथयति। यथा:–

1 ध्व.लो- ३
2 सा.द- ६.३२९

**"हे स्नेहाद्रे शृणु वचनकं सृष्टिरेषा विचित्रा। !"[3]**

सृष्टिः भवति परिवर्त्तनशीलाः। पण्डिताः इयं सृष्टिं सारसृष्टिं इति वदन्ति। परन्तु विचार दृष्ट्या इदं सकलं नश्वरम् भंगुरं च। अतः कथ्यते –

**"शृणु प्रिये गिरं मनोरमां ! सारि !**
**संसारसृष्टिश्च मुदा वुधेरिता।**

**विचारभङ्ग्या सकलं च नश्वरं (भङ्गुरं)**
**तथा च तारादेव–चन्द्र–रवि–ताः।।"[4]**

संसारस्य असारता एव महत् सत्यं। तथैव जीवनं फेनाभ इव। इदमपि निष्ठुरं सत्यम्। यथा –

**"महत्तु सत्यं जगतः व्यलीकता**
**तथा च फेनाभ निभं सुजीवनम् ।।"[5]**

प्रकृतिपुरुषसंयोगात् सृष्टिर्भवति, प्रकृतेर्जनत्वात् न तस्याः एव सकाशात् संसारो जायते न च पुरुषस्य निष्क्रियत्वात् तस्मादेव। सृष्टिकृते द्वयोरपि संयोगऽपेक्षते। चेतना विष्ठातृणायमेव जडप्रकृतिः सृष्टिकार्यं कर्त्तुं शक्नोति। प्रकृति पुरूषयोः संयोगे कारणं किमित्यत्राह सांख्यकारिकायाम्:–

**"पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य।**
**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः।।"[6]**

अस्मिन् दूतकाव्ये कविः रचयति – हे सारिके ! त्वम् अस्मिन् सृष्टेः प्रकृति पुरुषस्य प्रक्रिया विषये सम्यक् जिज्ञासति। परन्तु धातुः वीणा वादने चतुका मानवाः एतत् विस्मरन्ति। पुनः कोऽपि प्रकृति पुरुषस्य वास्तवतायाः उपलब्धिम् अपि न कुर्वन्ति एवं स्थिरचित्ते ब्रह्मास्वादनं कर्त्तुं न वाञ्छति।

**"ब्रह्माऽऽस्वादं स्थिरतरहृदा नेच्छतीह प्रमाणं।**
**लोभ्यं भव्यं प्रकृतिकदाऽपि।। पुरुषं नो स्मरेत् कः–"[7]**

चौरदृष्ट्याम् इदं संसारं प्रवञ्चनापूर्णं। कविदृष्ट्यां इदमानन्दकरं तथा भक्तिदृष्ट्या इदं ब्रह्ममयं तथा प्रेमिकदृष्ट्या इदं प्रेममयम्। परन्तु मोक्षग्रस्तः गृही ममतया आवद्धः सन् इदं संसारं ममेति उच्यते। यथा –

**"सृष्टेरर्थः भवति नियतं बंचनं चौरदृष्ट्या।–**
**आनन्दान्तः कथयति कविः ब्रह्मधृक् भक्तिभुक्तः**
**प्रेमाक्तो वा वदति सततं लुब्धकः प्रेमदिग्धः**
**गेही मोही सकलमितिमे मोहितः भाषते वा।।"[8]**

कविः प्रज्ञादूते दर्शयति यत् ममैव सर्वम् ईदृशं चिन्तनं मनः दूषयति। तथा च अहं भावना मोक्षस्य प्राप्तये वाधां सृष्टिं करोति। उच्यते –

**"ममेति चिन्ता मतिघातिनी चिरम्।"[9]**

---

[3] प्रज्ञा दू- ३०
[4] प्रज्ञा दू१५ –
[5] प्रज्ञा दू१०० –
[6] सांख्य.का- का.२१
[7] प्रज्ञा दू२६ –
[8] प्रज्ञा दू५९ –
[9] प्रज्ञा दू३३ –

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

आचार्यशंकरः मोहमुद्गरमाध्यमेन मोहस्य विनाशाय मानवोद्धारस्य सरलं उपायं वर्णितवान्। तस्य काव्यस्य अनुशीलनम् अस्मिन् दूतकाव्ये कृतम्। यथा –

**"का वा कान्ता क इह तनयः कस्य वाकोऽत्र बन्धुः।**
**स्वार्थाचारसबिता सर्वतः व्यब्त्तकान्तिः। –प्रभव –**
**यावत् शक्तिः स्वकृति विषये रक्तिरेवं खिलस्य**
**पश्चाद्वृद्धः बलहतः कोऽपि पृच्छेन्न गेहे।। –गति –"**[10]

अर्थात् का कस्य कान्तायावत् कः कस्य तनयः एवं कोऽत्र बन्धु। स्वार्थाचरणात् प्रभवः सविता सर्वत्रः व्यापितः। , स्वकृति विषये शक्तिः अस्ति। तावत् सर्वेषाम् अनुरक्तिः अस्ति। तत्पश्चात् यदा वृद्ध अभवत् तदा कोऽपि कस्मै न पृच्छति।

पुनश्च:-

**"जाया च काया च सुकान्तिकोमला–**
**छाया च माया च मरीचिकोपमा**
**विचारयेत् नो पथिकः ब्यथातुरः।**
**खिलं निजस्येति विभाव्य रोदिति।।"**[11]

अर्थात् सुकान्ति कोमला जाया छाया एवं च माया इदं , काया , सर्वं मरीचिका इव। पथिकः इदं न विचारयित्वा इदं सर्वं निजस्येति मत्वा रोदिति।

विशालधाम्नि प्रतिभा प्रभाकरस्य किरणेन दीप्त सन् इदं नरः सकलं विचारयेत्। "निजस्येति" , "ममेति ममेति"

**"विशालधाम्नि प्रतिभा–प्रभाकरः**
**खिलं निजस्येति विचारयेत् मुधाः।।"**[12]

**"मायामोहादिभिरनुदिनं पीडिताः नष्टनीडाः।**
**"सर्वं तावत् मम" इति मुधा वीरतां द्योतयन्ति।।"**[13]

विवर्त्तनात् अस्य विश्वस्य नाशं भविष्यति एवं भस्मावशेषात् पुनः नूतनसृष्टिः जायते। अतः मिश्रेणोच्यते –

**"विश्वस्य नाशो भविता विवर्त्तनात्।**
**भस्मावशेषात् नवसृष्टिरूज्वला।–"**[14]

**ब्रह्मसत्यम् –**

यद् वस्तु शाश्वतिकं परिवर्तनरहितं अविनश्वरं च तत् सत्यंअतोऽअन्यद् असत्यं मिथ्या वा। एवं चिन्तनेन , सत्यं शाश्वतिकम् अपरिवर्तनशीलम्। अतः तस्य सत्यता न सिध्यति यद् जगद् असत्यं जगतः परिवर्तनशशीलत्वात्। ब्रह्म च केनाऽपि रूपेणाक्षेप्तुं शक्या। वेदान्तदर्शने ब्रह्म निर्विकल्पं निरुपाधि निर्विकारं चेति उररीक्रियते। तद् ब्रह्म द्विविधं निर्गुणं सगुणं च। निर्गुणं ब्रह्म परमार्थदृष्ट्या सच्चिदानन्दस्वरूपम्। तदेव जगतः प्रकाशकम्। आत्मा एव ब्रह्म अस्ति। जगतः सर्वे जीवाः तु ब्रह्मैव सन्ति। अज्ञानवशात् ते पृथग्रूपाः दृश्यन्ते। प्रलयकालेऽपि यदा सर्वं जगद् विनश्यति ब्रह्म पूर्ववत् तिष्ठति। जगतः सर्वस्वं ब्रह्मैव स्वीकरोतिदेव परमात्मारूपेण तदेव जगतः चराचरस्य उपादानकारणं निमित्तकारणश्चास्ति। एत ,

[10] प्रज्ञा दू५ –
[11] प्रज्ञा दू- ५१
[12] प्रज्ञा दू१६ –
[13] प्रज्ञा दू६ –
[14] प्रज्ञा दू- ८८

विश्वस्य अखिलस्य मूले तिष्ठति। सम्प्ूर्णऽयं लोको ब्रह्मणः एव विवर्तः विद्यते। सः एकोऽद्वितियश्च अस्ति। यथा –

**"ब्रह्माऽऽस्वादं स्थिरतरहृदा नेच्छतीह प्रमाणम्।।"**[15]

इयं सृष्टौ कीटादारभ्यः ब्रह्मणः यावत् यानि सर्वाणि द्रव्याणि सन्त्येव सर्वं ब्रह्ममयम्। सर्वेषां हृदये तत् सच्चिदान्दरूपेण विद्यमानं भवति। कोऽपि नीचः अथवा उच्चः नास्ति। तस्य अदृश्य शक्तिः सर्वत्र अनुभूयते। अतः मिश्रेणोच्यते –

**“कीटाद् ब्रह्म प्रभवति सदाअदृश्य – शक्ति– प्रलिढं।**
**सर्वेषां वै हृदयकान्तिः। –कमले सच्चिदानन्द –**
**को वा नीचः कइह च महान् नैवभाति प्रमाणं।**
**मोहाक्रान्ताऽयन –वचनके वोच्चप्रवाहः।। –नीच –"**[16]

ये जनाः कदापि सत्मार्गं न त्यजन्ति। ते आनन्देन ब्रह्मम् आश्रयन्ति। यथा –

**"त्यजन्ति नो सत्यपथं चिरन्तनं**
**भजन्ति वै ब्रह्मपदं मुदाऽऽतुराः।। –"**[17]

ब्रह्मात्मना मनयोगं हि चिरन्तनं शाश्वतं च। ब्रह्मधाम्नि आत्मना सह आत्मा संयुज्यते।परन्तु सृष्ट्यां मनुष्यः भेदमूलकं वार्तालापं करोति। अपि च विश्वपितुः ब्रह्मास्वादनं अतीव सुखदायकं तथा जीवान् हसयति। यथा –

**"आत्मन्यात्मा मिलति मधुरं ब्रह्मधाम्नि प्रकामं।**
**सृष्टौ लोकः कथयति कथां भेदभाबात्मिका वा।–**
**सर्वत्रैवं सरति निरतं विश्वपातुः प्रलीढः।**
**ब्रह्माऽऽस्वादः परमसुखदः प्राणिनां प्राणहासी।। –"**[18]

ब्रह्मस्वादने मोक्षलाभं भवति। यथा:–

**"ब्रह्मास्वादैः भजतु परमं मोक्षकं लक्षलाभी।। –"**[19]

मेधा शक्त्याः मनुष्यः ब्रह्ममयेन तेजसा उज्ज्वलितं भविष्यति। मनुष्यः सत्यमयं भूत्वा ब्रह्मामृतं पास्यति। यथा –

**"जनप्रवाहः मिलितः प्रमेधसा**
**भविष्यन्ति ब्रह्ममयेन तेजसा।"**[20]

ब्रह्मास्वादैः हि महाकालः सुखी भवति। यथा –

**"ब्रह्मास्वादै भवति सुखिनः काल एवं प्रमाणम्।।"**[21]

**१.२– जगन्मिथ्या :–**

वेदान्तानुसारं जगत् नितान्तासत्यपदार्थमस्ति। जीवः अज्ञानेन मिथ्या जगत् मन्यते। एष ब्रह्म आत्मा वा यदा मलिनसत्वोपाधियुतो भवति तदा ईश्वरः इति संज्ञा लभते। परं यदा मलिनसत्वोपाधियुतो भवति तदा जीवः कथ्यते।

एकमेव ब्रह्म मायया अनेकानि रूपाणि धारयति। मायैव अविद्याविवर्तादिशब्दैः –अध्यारोप –अज्ञान – –व्यवह्रियते। वेदान्ते त्रिविधा सत्ता स्वीक्रियते १पारमार्थिकी सत्ता। .३,व्यावहारिकी .२,प्रातिभासिकी. व्यवहारदृष्ट्या तु तदनुभूति न निर्मूला। एकस्यैव तत ,वेदान्तानुसारं तात्विक दृष्टैव जगन्मिथ्येति्वस्य समष्टि –

---

15 प्रज्ञा दू– २६
16 प्रज्ञा दू– २९
17 प्रज्ञा दू४३ –
18 प्रज्ञा दू– ५६
19 प्रज्ञा दू– ५८
20 प्रज्ञा दू७८ –
21 प्रज्ञा दू– ६६

इति सङ्गच्छते। इदं कथनं 'तत्वमसि' पेण नामान्तरं ब्रह्मजीवात्मानौ इति। ब्रह्म साक्षातकारे द्वयोरेक्यस्यानुभूतेःव्यष्टिरू सुष्ठु एवास्ति यत् इदं सम्पूर्णं जगत् ब्रह्मैवास्ति। तद्व्यतिरिक्तं तु असत्यम्।

**“ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।”**[22]

ब्रह्मास्वादैः समग्र धरणी तत्वतथ्यावतिर्णा भवति। ब्रह्म एव सत्यं, जगन्मिथ्या प्रचारं कुर्वन्ति। यथा:-

**"ब्रह्मा आस्वादैः भवति धरणी तत्त्वतथ्यावतिर्णा।।-"**[23]

**"सत्यं ब्रह्माऽखिलजगदिदं छन्नमेवं मृषा वै।।-"**[24]

### १.३- माया

वेदान्तदर्शने माया संज्ञकमेकं तत्वं वर्णितमस्ति। आचार्यशङ्करो ब्रूते यत् माया भगवतो ब्रह्मणोऽव्यक्तशक्तिरस्ति। सा माया त्रिगुणा अविद्यारूपिणी च। न तदीय आदिर्ज्ञायते।अविद्या सत्यमावृणोति (माया) असत्यश्च वितनोति। यदैव ज्ञानज्योतिः प्रादुर्भवति।तदैव तद् अज्ञानंआचार्यशंकरः तिरोहितं जायते। (अविद्यामाया) परं परवर्तिनो वेदान्तिनः तत्र भेदं दर्शयन्तः प्राप्यन्ते। माया ,माया पदानि एकस्मिन्नेवार्थे प्रयुयोजः -अज्ञान -अविद्या शुद्धसत्वप्रधानास्ति। अविद्यास्ति मलिनसत्वप्रधाना। माया ईश्वरस्योपाधिरस्ति जीवस्ृय च अविद्या। सानन्दो 'माया' श्च अविद्यां व्यष्टिगतमज्ञानमिति नाम्ना व्यवहरति।समष्टिगतज्ञानं कि माया इत्युक्ते आचार्यशंकर परमेश्वरस्य शक्तिं एव मानन्ति। इयं मायया समग्र जगतः सृष्टिं भवति। प्रज्ञादूते कविः वर्णयति यद् सर्वेऽपि मानवाः मायादियुक्ताः कलुषिताश्च भुत्वा पापपरिपूर्णाः सन्तः अपौरुषत्वम् पौरुषत्वमिति विचारयति।

**"एतद् विचित्रं यदहो जनोऽखिलः**
**मायादियुक्तः कलुषातिलोलितः**
**काले कलङ्कैः कलयत्यपौरुषं**
**केलिस्फुटं पौरुषमेव भाव्यते।।-"**[25]

ममेति ममेति मुहुर्मुहुः उक्त्वा पुनः पुनः मदान्धः मानवः मोहरूपी महान्धकारेण ज्वरग्रस्तः। अन्तिमावस्था समुपस्तितेऽपि सः लोभं त्यजयितुं नैव शक्नोति।

**"ममेति वाचं कथयन् मुहुर्मुहुः।**
**मदालसः मोह,महान्धसा ज्वरी-**
**महाप्रयाणायन-यात-तत्परः**
**तथापि लोभं त्यजतीह नो पुनः।।"**[26]

इदं संसारं मायामयमिति विचार्यं तत्वार्थपूर्णकार्यं करणाय कविः उपदिशति अत्र यथा –

**"मायामयं विश्वमिमं विचारयन्**
**तत्त्वार्थसंकासकृतं कुरुष्ववै।।"**[27]

कर्त्तव्याकर्त्तव्ययोः अवधारणरूपो शास्त्रं धर्म इति कथ्यते। जगन्मूलत्वेन संस्कृतनियामकानि तत्वानि धर्माः। अस्मिन् काव्ये कविः वर्णयति प्रयाणकाले धर्म एव सुहृद् भवति। यथा:-

**"प्रयाणकाले सुहृदेव धर्मकः।।"**[28]

---

[22] वेदा.सा-
[23] प्रज्ञा दू- ६३
[24] प्रज्ञा दू- ६४
[25] प्रज्ञा दू- ३७
[26] प्रज्ञा दू- १२
[27] प्रज्ञा दू९३ –
[28] प्रज्ञा दू- ८९

© 2024, The Brāhmī 

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

अस्मिन् दूतकाव्ये कविः दूतरूपी प्रज्ञाम् अर्थात् वेदोज्वलाबुद्धिं सृष्टेः धर्म रक्षार्थं प्रेरयति।

**उपसंहारः-**

प्रज्ञादूतस्य विषयवस्तुनः ज्ञायते यत् काव्यमिदं दूतकाव्यपरम्परायामेका सफलप्रचेष्टा। काव्यमिदं दार्शनिकतत्वानाम् उपरि विरचितम्। काव्यकारः पण्डितः प्रबोधकुमारमिश्रः निर्विवादेन प्रतिभावान् कविः। काव्यरचनाक्षेत्रे तस्यासाधारणं नैपुण्यं विद्यते। काव्यं भवति संसारस्य प्रतिफलनम् । अत्र कवेर्वर्णनमतीव हृद्यं भावगम्भीरं चास्ति। प्राणिनः जन्म धूलेरेव सम्भवति। मृत्योरनन्तरं सोऽपि धूलौ प्रलीयते। अतः केवलं ब्रह्मणि एव मनोनिवेशः करणीय इति कविः कथयति। शरीरमिदं भस्मसात् भविष्यति। मृत्युना सहाभिलाषोऽपि समाप्ति यास्यति। तथाप्याशा सर्वदा तरुणायते इति सूचयति कविरत्र। काव्यस्यास्य केषुचिद् स्थलेषु जगद्गुरोः शंकराचार्यस्य प्रभावोऽपि परिलक्ष्यते। अत्रैकः श्लोकः मोहमुद् गरस्य ' का ते कान्ता कस्ते पुत्रः' इति पंक्तिं स्मारयति। कीटादारभ्यः ब्रह्मपर्यन्तं सर्वं ब्रह्ममयम्। तत्र न कोऽपि नीचः उच्चः वास्ति। मोहग्रस्तः नर एवोच्चनीचभेदं कल्पयतीति अत्रोक्तमस्ति। जीव एव भवति शिवोपमः। परन्तु मानव एतत् विस्मृत्य पशुवदाचरति। परमात्मनः इच्छया मानवः संसारेऽस्मिन् कियद्दिनं यावल्लीलां रचयतीति साधुः शारिकां कथयति।

**सहायक ग्रन्थसूची :-**

1. Mishra Prabodh Kumar, *"प्रज्ञादूतम्"*, Orissa Book Store Binod Bihari, Cuttack,1994.
2. Thakur Krushna mohan, Das Jay Krishna, Gupta Haridas, *"साहित्यदर्पणः"*, Chaukhamba Sanskrit Series Office Vanaras,1947.
3. Mishra Shobhit, Das Krishna, Haridas Gupta, "*ध्वन्यालोकः"*, Chaukhamba Sanskrit Series Office Vanaras,1953.
4. Mani Ravikanta, "*सांख्यकारिका"*, Hansa Publication, Jaypur,2018.
5. Mishra Lambodar, "*वेदान्तसारः"*Rashtriya Sanskrit Sahitya Kendra Saraswati Sadan, Jaypur,2018.

The Brāhmī, International Multidisciplinary Research Journal

(Peer Reviewed, Referred & Open Access Journal)

Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

# शोणितस्वाक्षरकाव्ये गङ्गावर्णनम्

**कल्पना नायकः**

Ph.D. Research Scholar
P.G. Department of Sanskrit
Utkal University, Vani Vihar, Bhubaneswar

स्वाधीनतोत्तरवर्त्तिसमये संस्कृतस्य सर्जनसाहित्ये उत्कलीयकविः व्रजसुन्दरमिश्रः एकं स्वतन्त्रस्थानमध्यारोहति। संप्रति उत्कलप्रदेशस्य उत्कलविश्वविद्यालये उपाध्युत्तरसंस्कृतविभागे उपाचार्यरूपेण सेवारतेनानेन कविना विरचितेषु खण्डकाव्येषु शोणितस्वाक्षरम्, चन्द्रभागा, कार्गिल्‌काव्यम्, निसर्गनायिकादिकाव्यानि प्रसिद्धिमधिगतानि। एतेषु शोणितस्वाक्षरं भवति कवेरस्य प्रथमं काव्यम्। विंशत्यधिकशतसंख्यकसमन्विते काव्येऽस्मिन् भारतवर्षस्य सांप्रतिकी अवस्था, देशस्य कल्याणार्थं कवेः काचिद् भावाभिव्यक्तिश्च समुपस्थापिता। प्रसङ्गक्रमेण काव्येऽस्मिन् गङ्गानद्याः जलदूषणस्य चित्रं कविना प्रतिपादितम्। अस्मिन् गङ्गावर्णनप्रसङ्गे कवेः भक्तिभावः सुस्पष्टं प्रतिभाति। तदेव भवति शोधपत्रस्यास्य विषयवस्तुः।

अस्मिन् काव्ये गङ्गाप्रसङ्गे दशश्लोकाः सन्ति। तत्राद्ये कविः गङ्गायाः महत्वं वर्णयन् लिखति-

वन्द्या विष्णुपदी सुरासुरनुता भूमेखला भीष्मसुः
शान्तस्निग्धतरङ्गपङ्क्तिहृदया पूतां पुनः पावनी।
लोकानामघनाशनैकसलिला दिव्याङ्गवल्लीयुता
या सेयं जननी शिवप्रणयिनी मन्दाकिनी दुषिता।

**शोणितस्वाक्षरम् (शो.स्वा.) २७**

अस्मिन् श्लोके आदौ गङ्गादेव्याः नामद्वयं ब्रह्माविष्णुदेवयोर्नामेन नामिता यथा – विष्णुपदी भीष्मसुः च। अस्याः नामान्तरत्वेन विष्णुपदी भीष्मसूः इति शब्दद्वयं अमरसिंह कृत अमरकोषे वारिवर्गे एवं रूपेण प्राप्यते –

"गङ्गा विष्णुपदी जह्नुतनया सुरनिम्नगा।" (पंक्तिक्रमाङ्कः ५२८)

भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि (पंक्तिक्रमाङ्कः ५२९)

या देवी देवासुरैः पूजिता यस्याः शान्तस्निग्धतरङ्गपंक्तयः हृदयाकर्षकाः, या गङ्गा स्वयं पवित्रा अन्यानापि

पवित्रयति, जनानां महाघनाशनाय सक्षमा, सा शिवप्रणयिनि मन्दाकिनी गङ्गा अद्य दूषिता। अतः कवेः दुःखितः हृदयोच्छ्वासः नैतिकताया अवक्षयस्य चित्रञ्च उपस्थापयन्ति। अनेन खण्डकाव्येन गङ्गावर्णनप्रसङ्गे कवेः सुस्पष्टखेदोक्तिः उद्भासति।

या गङ्गा ब्रह्मदेवस्य तनुजा। हिमालयस्य शिखेर प्रवाहिता सर्वदा पुण्यदाश्च। या पुनः त्रिशुलधरः त्रिनेत्रः तेजस्वी भगवान् शङ्करस्य शिरसः न्यस्ता। सदापुण्यदा कल्याणी चिरचिनमयी भगवती गङ्गायाः एताः सर्वाः विशेषणाः तस्याः महनीयतां प्रतिपादयति। "भर्गोत्तमाङ्ग" इति स्थिते 'भर्गः' शब्दः देवस्य देवः महादेवस्य कृते प्रयोगं भवति अमरकोषस्य स्वर्गवर्गे यथा –

हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः (पंक्तिक्रमाङ्कः ६६)

महादेवस्य उत्तमाङ्गे इत्यर्थ शिरसि गङ्गा प्रभवति। अतः गंगा देव्याः प्रभावः लक्षणाशक्त्या अनुमीयते। पुनः देवराज इन्द्रेण सह अन्य देवैः, दानवैश्च अभ्यर्च्यमाना, यां गङ्गादेवीं मानवाः माता इव पूजयन्ति। सा मन्दाकिनी शिवप्रणयिनी गङ्गा अधुना प्रदूषिता। अतः कवेः उक्तिर्यथा –

विश्वक्सेनसुता नगेशशिखरन्यस्ता सदा पुण्यदा
कल्याणी चिरचिन्मयी भगवती भर्गोत्तमाङ्गस्थिता।
दिव्या देवदिवेशदानवगणैरभ्यर्च्यमाना च या
सेयं नो जननी शिवप्रणयिती मन्दाकिनी दूषिता।।

**(शो.स्वा. २८)**

सगरस्य पुत्राणां मुक्त्यर्थं तथा च धरणी हिताय तपसोबलेन भगीरथः इमां नदीं स्वर्गात् पृथ्वीं प्रति मनुष्यहिताय आनयत्। अतः अस्या नाम भागीरथी इति पसिद्धम् या दयादायिनी चिरन्तनी स्वर्गङ्गा नराणां मङ्गलाय, पृथिव्यां शान्त्यै प्रगत्यै च, न केवलमियं वर्षासु एव वहति अपितु निखिलं वर्षपर्यन्तं स्वनिर्मलेन स्रोतसा भारतधरणीं पुनाति। स्वस्पर्शेण सर्वविधं पापं क्षालयति। पतितोद्धर्त्री सा गङ्गा अधुना लज्जाजर्जरितापमानेन मलिना स्वयं दूषिता च। यः भगीरथः समाजस्य कल्याण निमितं स्वर्गात् महताकष्टेन इमाम् आनीतवान्। अधुना अस्मद्विधाः राज्ञः भगीरथस्य दायादाः सुप्ताः एव। एनं वीक्ष्य व्यथितहुदययुक्ता कवेः उक्तिर्यथा –

© 2024, The Brāhmī

यानीता धरणीहिताय नभसो मर्त्यं दयादायिनी
स्वर्गङ्गा नरमङ्गलाय महते माता भुवो भास्वती।
यानीता त्वघनाशनाय पृथिवीं शान्त्यै प्रगतुं पुनः
शेयं नो जननी शिवा च पतितोद्धर्त्त्री स्वयं दूषिता।।

(शो.स्वा. २९)

यानीता च भगीरथस्य तपसा तत्पूर्वजानां कृते
तेषां क्षालयीतुं विवर्णवृजिनं स्वस्पर्शतः पार्थिवम्।
सैषा वीक्ष्य भगीरथं प्रतिनिधिं सुप्तं समाजस्य नो
लज्जाजर्जरितापमानमलिना भागीरथी संप्रति।।

(शो.स्वा. ३०)

यस्याः गङ्गानद्याः तटे हरीद्वारकाशीप्रयागसदृशानि पवित्राणि तीर्थस्थलानि सन्ति। सर्वेषु धर्मकृत्येषु अस्या जलमेव पवित्रमिति शुभं मन्यते। अतः श्रद्धावन्तः ऋषयः गङ्गास्नानं कर्त्तुं यात्रा कुर्वन्ति। तस्याः तीरे अपि तपः कुर्वन्ति। पुतात्मानाम् ऋषीणामाश्रमाः अपि आसन् यतः सर्वज्ञानं प्रसृतम्। पुनश्च स्वर्गनिमितं सोपानमेव वर्त्तते। गङ्गास्नानं सर्वाणि पापानि अपहृत्य मोक्षं धर्मं च ददाति इति जनाः मन्यन्ते वेदादिग्रन्थेषु महीयन्ते च। सर्वेषां प्राणिनां कृते मोक्षप्रदायिनी सा गङ्गा अधुना स्वयमेव प्रतिहता दूषिता च। कविना क्षुब्धहृदयेन लिखति –

यस्या रोधसि पुण्यभूतिधनिनस्तप्यन्त एवर्षयः
सोपानं त्रिदिवाय वा व्यरचयन् संस्पर्शजात् सौख्यतः।
सर्वान् प्रेरयतीश्वरालयकृते धर्माय मोक्षाय या
तस्या मोक्षपथोऽधुना प्रतिहतः सापि स्वयं दूषिता।।

**(शो.स्वा. ३१)**

अस्माकं पूर्वजानां कृते, गङ्गानदी पवित्रतमा अस्ति। यस्याः गंगायाः जलमति पवित्रं शुद्धं च मन्यते। गङ्गास्नानस्य वहु महत्वं कविना लिखितं यत् – गङ्गायाः शुद्धजलावगाहनेन पुण्यात्मानां जनानां कृते स्वर्गाङ्गनाः देवताश्च आलिङ्गनार्थं हस्तौ प्रसार्य वितानयन्ति। पुनः विध्यानुसारेण गङ्गाजलस्य स्पर्शेण नरः वैकुण्ठधामं

अधिरोहति। गङ्गाजलस्य पानेन, स्पर्शेण, गङ्गातीरे निवासेन च महान्शारीरिकलाभोऽस्ति। एवं स्वरूपिणी सा गङ्गा अधुना दूषिता अपमिश्रिता च। अस्मिन् श्लोके कविना जननी शिवप्रणयिती प्रभृतयः शब्दाः गङ्गानद्यार्थं उल्लिखिताः। यथा –

यस्याः शुद्धजलावगाहनफलैः स्वर्गाङ्गनाद्देवता
आश्लेषाय वितानयन्ति हि करं स्नातस्य पुण्यात्मनः।
वैकुण्ठे रमते नरो विधिमतं यस्या जलस्पर्शतः
शेयं नो जननी शिवप्रणयिनी मन्दाकिनी दूषिता।।

**(शो.स्वा. ३२)**

या गङ्गा स्वर्ग-मर्त्य-पातालाभिधं लोकत्रयं पवित्री कृत्वा अतीते मुनिमानसं उद्वेलितं कृतवती। धर्मार्थकाममोक्षाणां पुरुषार्थानां तपसे प्रेरयति प्रज्ञामयी जाह्नवी। धर्मार्थकाममोक्षो हि प्रत्यकमनुष्याणां लक्ष्यं भवेत्। तत् लक्ष्यं पूरणार्थे गङ्गादेवी उत्साहं अपि वर्धयति। तस्याः देव्याः साक्षात् दर्शनेन ज्ञानज्योतिः विकशति। हिमसुवर्णोत्तुङ्गशिखरे हिमालये मानसनामकात् सरोवरात् इयं नदी सवेगं निस्सरति परोपकाराय। कवेः अभिमतं यत् प्राचीनकालात् अस्माकं देशे पवित्रभावनापुज्यमाना एषा नदी इदानीं प्रदूषिता अस्ति। अतः कविः कथयति –

यातिते मुनिमानसं कृतवती दीप्ताय चोद्वेलितं
त्रिस्रोताः पुरुषार्थयोग्यतपसे पज्ञामयी जाह्नवी।
यस्या दर्शनमात्रतो विकशति ज्ञानारविन्दं मुदा
शेयं मानसरोवरे तु मनसो मन्दाकिनी दुषिता।।

**(शो.स्वा. ३३)**

पुनः कवेः अभिप्रायः यत् गङ्गानद्याः जलराशिं अत्यन्तं स्वच्छम्। स्वच्छादर्शे प्रतिविम्बं यथा प्रतिफलति तथैव शुद्धपरिस्कृतगङ्गाजले सूर्यदेवस्य प्रतिविम्बं तथैव प्रतीयते। स्वस्य जाज्वल्यमानाकृतिं स्वच्छगङ्गाजले दुष्ट्वा सानन्देन दिनकरः गछति। या गङ्गा मनुष्याणां हृदिस्थितः सांसारिकं असारकलां कामनां च पूर्णतया निर्वापयति। सा गङ्गा अति पवित्रा। श्लोकस्यास्य अन्तिमपादे कविना केवलं गङ्गोदकमेव अघनाशयितुं सक्षमम्। अतः कविना उक्तं –

स्वच्छे यज्जलदर्पणे दिनकरो जाज्ज्वल्यमाकृति
पश्यन्मोदगतिं प्रयाति नितरां सूर्यः सदा स्वात्मनः।
यन्निर्वापयति त्वसारसकलां सांसारिकीं कामनां
तन्नॄणामधनाशनैकसलिलं गङ्गाजलं पङ्किलम्।।

**(शो.स्वा. ३४)**

यथा पूर्वश्लोके सूर्यदेवस्य वर्णनं विद्यते तथैवात्र चन्द्रदेवस्य वर्णनम् अतीवनिपुणतया कविना वर्णितं। गङ्गाजले प्रतिविम्बितं चन्द्रं दृष्ट्वा मनः आह्लादितं भवति। अत्र व्यतिरेकालंकारमाध्यमेन चन्द्रः स्वं धिक्करोति, कारणं गङ्गाजलं ज्योत्स्नापेक्षा स्वच्छं पापनाशनं च। चन्द्रं निकषा केवलं निर्मलता वर्त्तते। अतः कविना उक्तम् –

सानन्दं प्रतिविम्बितां धवलितां शोभा विधुर्यज्जले
वक्त्रस्यैव भवन् विलोक्य मनसा चाह्लादितो मोदितः।
स्वात्मानं किल धिक्करोति सहसा भूत्वा तु लज्जानतो
तीव्रं तज्जनपावनैक सलिलं गङ्गाहलं पङ्किलम्।।

**(शो.स्वा. ३५)**

अन्तिमश्लोके कविना लिखितम् यत्, यस्यां गङ्गायां निर्मलजले स्नानेन मुग्धां दिग्वधूनां मुखमाधुरिं अविरतं शोभते। स्नानपरायणजनस्य पूनर्जन्मनः भयर्नास्ति। अस्मिन् श्लोके कविः गङ्गानद्याः श्रेष्ठत्वं उत्कर्षत्वं च प्रतिपादयति। अतः कविभाषायाम् –

दिग्वध्वो मुखमाधुरीमविरतं पश्यन्ति वै यज्जले
मुग्धास्ता वनितालता विकाशिताः स्नाताः सुधाब्धौ सदा ।
नास्ति स्नानपरायणाय च भयः क्लेशात्पुनर्जन्मनो
यस्मिन्वारिणि तप्तवित्रसलिलं गङ्गाजलं पङ्किलम्।।

**(शो.स्वा. ३६)**

शोणितस्वाक्षरखण्डकाव्यस्य गङ्गावर्णनप्रसङ्गे कविना भक्तिभावं प्रदर्श्य तस्याः नद्याः प्रदूषणविषयेऽपि चिन्ताप्रकटयन्ति। कारणं मनुष्यः सामाजिकजीव इति कथ्यते। अतः समाजस्योन्नतिपक्षे तस्य कानिचन कर्तव्यानि

सन्ति। परन्तु स्वार्थी मनुष्यः सर्वदा स्वस्वार्थरक्षणे व्यापृतो भवति। अतः भारतीयसर्वकारेण गङ्गायाः पुनः शुद्धीकरणार्थं कोट्याधिकं धनं व्ययितम्। 'नमामिगङ्गे' इति वृहत् प्रकल्पमाध्यमेन तस्याः नद्याः परिष्करणं उद्धारकार्यं च चलति अधुना। परन्तु यावत् पर्यन्तं वयम् आधुनिकाः नामरिकाः मानवाश्च जागरिताः न भवेम तावत् पर्यन्तं एषा समस्या भविष्यति।

काव्येऽस्मिन् विहितस्य गङ्गानदीवर्णनस्य विस्तृतं विवेचनमेव शोधपत्रेऽस्मिन् प्रस्तुयते।।

## *सन्दर्भग्रन्थसूची*

१. शोणितस्वाक्षरम्     ड. व्रजसुन्दर मिश्रः, विद्यापुरी वालुबजार, कटक-२, १९९१।

२. अमरकोषः     श्री. पं . हरगोविन्दशास्त्री, चौखम्भा संस्कृत संस्थान, वारणसी, २०१६।

३. अमरकोषः     महेश्वर यांच्या टीका, 'वरदा', सेनापती बापट रोड, पुणे, १९९०।

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

# स्वातन्त्रोत्तरोत्कलीयसंस्कृतसाहित्ये व्यङ्ग्यसाहित्यकारः डॉ.प्रमोदकुमारनायकः

**डा.रमेशकुमारदाशः**

संस्कृतविभागाध्यक्ष:
वृन्दावनसुबुद्धिमहाविद्यालय:, दशपल्ला, नयागड, ओडिशा

भाषायां व्यङ्ग्यवाक्यानां प्रयोग: पारम्परिकसंस्कृते भाणे प्रहसने च अदृश्यत। इदानीं तु सर्वविधासु रचनासु उपलभ्यते। कथासु वाग्व्यवहारो हि हास्योत्पादनस्य कारणं भवति। लेखकानां कवीनां वा कथासु परिस्थितिवशात् यथा सम्वाद: भवति, तै: तथा यत्र तत्र स्वेषां विचारधारा समावेश्यते। ते कुत्रापि अवसरं न प्रदाय स्वविचारधाराया: लक्ष्यं नीत्वा पाठकानां समक्षमुपस्थापयन्ति। पाठका: अपि एतेषां कौशलेन आत्मनं पूर्णरूपेण परितृप्ता: लभन्ते। अनेन प्रसङ्गेन स्वातन्त्रोत्तरोत्कलीयसंस्कृतसाहित्ये अद्वितीयसंस्कृतव्यङ्ग्यकथाकार: काव्यकारो वा डॉ.प्रमोदकुमारनायक: अन्यतम:। कविरेष: पुरीमण्डलस्य गोपसमीपस्थे गणेश्वरपुरग्रामे पञ्चषष्ठ्यधिकैकोनविंशशततमख्रीष्टाब्दे अप्रेलमासस्य सप्तविंशतितमे दिनाङ्के जन्म अलभत। श्रीरघुनाथनायक: एतस्य पिता, माता च अन्नपूर्णादेवी। अध्ययनकाले विद्यापीठे तथा च राज्यस्तरीये जातीयस्तरीये विविधतर्कादिभाषणप्रतियोगितासु अंशग्रहणं कृत्वा बहुविधान् पुरस्कारान् लब्ध्वा च स: गुरुवराणामतीवश्रद्धाभाजनोऽभूत्। विविधधर्मेणानुप्राणीतानां गुरुदीक्षितानां कुत्सितकर्ममयजीवनमवलोक्य तस्य मनसि विद्रोह: सञ्जात:। फलत: स्वस्य कर्मबहुलजीवने सारस्वतसाधकरूपेण केचन प्रसिद्धा: संस्कृतकृतय: समुपस्थापयन्ति। नायकमहोदयस्यास्य लेखनी एवमेव नानाविधा: व्यङ्ग्यसाहित्यरम्यरचना: रचयित्वा संस्कृतसाहित्यलोकं चिरं प्रमोदयति। केन्द्रीयसंस्कृतविश्वविद्यालयस्य श्रीरघुनाथकीर्त्तिपरिसरस्य निर्देशकाचार्यबनमालिविश्वलमहोदयस्य भाषायां यथा-

*हास्यव्यङ्ग्यकथाक्षेत्रे नायको नायकस्स्मृत:। लिखन्ति ये बलादन्ये ते सर्वे प्रतिनायका:।।*

*मोदयति कथाभिर्य: प्रकर्षेण च पाठकान्। स च सार्थकनामाऽस्ति प्रमोदो नात्र संशय:।।* [१]

महोदयस्यास्य कृतय: यथा-

**(१) उवाच कण्डुकल्याण:** - व्यङ्ग्यकथासंग्रहोऽयं १९९८ख्रीष्टब्दे लोकभाषाप्रचारसमित्या प्रकाशित:। संग्रहेऽस्मिन् हास्यरससमन्विता: शिक्षकसंग्रामसमिति:, केलिकदम्बकस्य इस्पातशिल्पम्, इत्याद्येकोनत्रिंशत् संख्याका: कथा: संकलिता: सन्ति। प्रथमत: मुखप्रच्छदे स्थितं चित्रं व्यङ्ग्यमुत्पाद्य पाठकहृदयमानन्दयति। चित्रेऽस्मिन् घूर्णायमानासन्दे पुष्पमाल्यार्पितम् उपविष्टं कुक्कुरं करपुटं विधाय गृहमुनिव: प्रणमति। गृहपत्नी करे समार्ज्जनीं धृत्वा गृहादागत्य साश्चर्यमवलोकयति। एतच्चित्रं व्यङ्ग्यमुत्पादयति। समाजे बहव: खाद्यवासवसनविहीनमनुष्या: दारिद्र्यस्य शक्ताघातै: रोगजर्ज्जरिता: सन्त: बहुकष्टमनुभवन्ति। परन्तु कुक्कुर: ऐश्वर्योपभोगं

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

करोति। कुक्कुरः कथमिति लेखकश्रीमतः डा.नायकस्य भाषया-

*......विदेशिकुक्कुरजन्मनः माहात्म्यम् अपूर्वम्। चरितम् अनन्तम्। ........... परन्तु अधिकधनप्रदानपूर्वकं क्रीतः विदेशिकुक्कुरः प्रत्यहं स्नेहसागरे सन्तरति।*

*न खलु साधारणमानवाः परन्तु वित्तशालिनः, उच्चपदाधिकारिणः ज्ञानिनः सयत्नं पालयन्ति। एतस्य प्रथमागमनदिने गृहे उत्सवः भवति। यत्र कुत्रापि गच्छन्ति, प्रथमतः अस्यैव विषये आलोचयन्ति। अस्यैव कीर्त्तिं विचारयन्ति। मिट्ठु, पपु, डन्, जन् इत्यादि नाम्ना आह्वयन्ति।*

*प्रातर्भ्रमणं सायं भ्रमणं वा भवतु। यानेन कः गच्छतु वा न गच्छतु। स्नेहपालितः मिट्ठु (कुक्कुरनाम) अवश्यं गमिष्यति। गृहस्वामिनी तु तं विना क्षणाय जीवितुमसमर्था।*

*........ गृहस्वामिन्याः प्रकोष्ठमपि एतस्य कृते उन्मुक्तम्। महाविद्यालयपाठिनी कन्या तु गमनागमनकाले अवश्यम् अस्य मुखे चुम्बं प्रददाति। तस्याः उद्धतवक्षोदेशे वारंवारम् अलिङ्गति।* [२]

<u>खाद्यपेयस्य विषये</u>- *अस्माकं कृते शुष्का रोटिकाऽपि कदाचित् न लभ्यते परन्तु एतस्य कृते मांसादिकम् अवश्यं प्रत्यहं मिलिष्यति। सूपकारः सयत्नं करिष्यति पाककार्यम्।* [३]

<u>स्नानविषये</u>- *......परन्तु विदेशिकुक्कुरशरीरं सुगन्धफेनकैः प्रक्षालितं गृहभृत्येन नातिशीतोष्णजलेन।* [४]

एवमेव कुक्कुरः समाजे विशिष्टस्थानमधिरोहति। परन्तु मानवः तस्मात् एवमेव कीटपतङ्गादपि व्यवहारेण न्यूनं भवति। समाजस्य एतादृशीमवस्थामवलोक्य लेखकः सामाजिकान् उद्बोधयितुं चेष्टते। संग्रहस्यास्य अन्तस्थितकथावस्तुनरेकस्य शीर्षकमानीय उवाचकण्डुकल्याणः इति शीर्षकं समुपस्थाप्यते। यतो हि संग्रहस्यास्य सर्वासु कथासु केषाञ्चिद् विशिष्टजनानाम् आमोददायकावस्थाभिः सह तेषां प्रवञ्चनादिकानां कार्यकलापैः साधारणजनानाम् सखेदं दारिद्र्याद्यवस्थाः उपवर्ण्यन्ते। विशेषतः प्रच्छदपटे स्थिते चित्रे गृहपत्नी यथैव केवलं साश्चर्यं पश्यति किमपि वक्तुकामा सती सुयोगमप्राप्य तूष्णीं तिष्ठति। एवमेव सर्वासु कथासु प्रायतः अनभिज्ञाः मूढाः धूर्त्ताः जननायकादयः राजनीतिज्ञाः किमपि न ज्ञात्वा यदिच्छन्ति चिन्तयन्ति वा तदेव कथयन्ति, कुर्वन्ति कारयन्ति च। परन्तु साधारणजनाः मार्जारसुन्दरीवत् किञ्चिद् वक्तुमभिलषन्ति, परन्तु तूष्णीं स्थातुं वाध्याः भवन्ति। उवाच कण्डुकल्याणः इति संग्रहस्यास्य शीर्षकनामकरणात् केवलं न, अपि च अन्तस्स्थितकथास्वपि विविधांशेषु हास्यव्यङ्ग्यो परिस्फुट्यते। नवनवनिर्मितशब्दैः कथानां नायकानां नायिकानां च नामकरणमस्य लेखकस्य सुमहद्वैशिष्ट्यम्।

**(२)स्वर्गादपि** गरीयसी– लघुकलेवरयुक्तव्यङ्ग्यकथासंग्रहोऽयं २००२ख्रीष्टब्दे लोकभाषाप्रचारसमित्या प्रकाशितः।

संग्रहेऽस्मिन् यमबहुपतिकासम्वाद:, साक्षात्कार:, स्वर्गादपि गरीयसी, आमन्त्रणम्, निमित्तमात्रम्, परीक्षा, आदिभाषाप्रसङ्ग:, सेवक: चेति कथासु हास्यव्यङ्ग्यशैल्या सामाजिकसमस्या: परिप्रकाश्य ता: समस्या: समाधीयन्ते। कथासु स्वर्गादपि गरीयसी इति कथायां भारतीयानां प्रवञ्चनां चौर्यवृत्तिञ्च आधारीकृत्य लेखकेन आक्षिप्यते। प्रागेव सज्जनानां महापुरुषाणां कृते अस्माकं मातृभूमि: स्वर्गादपि गरीयसी आसीत्। सम्प्रति तु चौर्याणां कृते अस्माकं मातृभूमि: स्वर्गादपि गरीयसी। अष्टसंख्याका: कथा: नीत्वा कथासंग्रहोऽयं त्रुटिरहितं मुद्रणं, शोभनमुखपृष्ठं च भवति। तथा चास्योपरि अङ्कितचित्रं समधिकमाकर्षयति। अत्र स्थितकथासु बहुपतिका, उत्कोचप्रियशास्त्री, आचार्यमन्दमति:, शास्त्रनिन्दकत्रिपाठी, युवतिरङ्क:, चम्पकवर्णा, सर्वगिल:, प्राणप्रिया मर्कटरदना चेत्यादीनां चरित्राणां पात्राणां वा नवनिर्मितशब्दै: लेखकस्य सुमहद्वैष्ट्यिं प्रतिपाद्यते।

**(३)कथासप्तति:-** सामाजिकघटनानां रोचककथासंग्रहोऽयं २००३ख्रीष्टब्दे लोकभाषाप्रचारसमित्या प्रकाशित:। स्वतन्त्रभारतवर्षे शिक्षका:, राजनेतार:, समाजसेवकादयश्च सर्वे सामूहिकसुखसमृद्धिं विहाय स्वस्वार्थसिद्धये निरन्तरं प्रयासरता: सन्ति। फलत: सर्वत्र अन्यायेन, दुर्नीतिना च प्रशासने कालुष्यतां साधयित्वा राष्ट्रवर्धने ये अन्तराया: भवन्ति, तान् पथभ्रष्टान् हास्य-व्यङ्ग्यकथामाध्यमै: सन्मार्गे परिचालयितुं सामाजिकघटनानां विवरणं विधातुं कवि: यतमान: दृश्यते। तत्र अस्पृश्य:, भ्रातृप्रेम, नेता, चौर:, निरपेक्ष:, रूपाजीवा, परिवर्त्तनम्, राजपुत्र:, सेवा इत्यादयश्च सप्ततिसंख्याका: कथा: कथासंग्रहेऽत्र समुपस्थाप्यन्ते।

**(४)स्वर्गपुरे-** स्वातन्त्र्यभारतवर्षे चारित्रिकपतनस्य हेतो: विपर्यस्तजनजीवनं समक्षं समुपस्थाप्य हास्यव्यङ्ग्यशैल्या विरचितोऽयं व्यङ्ग्योपन्यास: २०१२तमे ख्रीष्टाब्दे डा.नारायणदासेन सम्पादित: श्रीमतीसवितादासमहोदयया प्रकाशितश्च। विबिधक्षेत्रेषु प्रवञ्चका: सर्वान् वञ्चयित्वा स्वकार्यकरणाय सततं चेष्टिता: भवन्ति। चिकित्साक्षेत्रेऽपि प्रवञ्चका: प्रविश्य चिकित्सकभावेन मिथ्याप्रमाणपत्रं संगृह्य पदवीं प्राप्य सर्वकारीयचिकित्सालयात् स्वचिकित्सालयं प्रति अधिकांशरोगिण: नयन्ति। शिल्पागारे युरिआप्रभृतिभि: विबिधै: विषाक्तपदार्थै: अधिकलाभार्थं प्रवञ्चका: व्यवसायिन: मद्यानि प्रस्तुवन्ति। एवमेव आपणिकानामधीने कार्याणि कृत्वा तेषाम् आपणानां निजीकरणाय प्रचेष्टा, भिक्षुकै: भिक्षुकसंगठनं, क्रीडाक्षेत्रे प्रवेशाय उत्कोचग्रहणं, सेवकरूपेण स्थित्वा धनापहरणात् पलायनादीन् विविधविषयान् अवतारयन् प्रतीकाररूपेण च दण्डविधानं वर्णयित्वा औपनासिक: डा.नायक: संस्कृतव्यङ्ग्योपन्यासक्षेत्रे अद्वितीयस्थानमधिगृह्णाति।

**(५)गर्त्त:-** कवितासंग्रहोऽयं १९९८ख्रीष्टब्दे लोकभाषाप्रचारसमित्या प्रकाशित:। दुर्नीतिदूरीकरणाय अत्याचारविनाशनाय च व्यङ्ग्यशैल्या भावगम्भीरात्मकमर्थं प्रतिपाद्य धूमकेतु: इत्यादि त्रियपञ्चाशत् कविता: संग्रहेऽत्र विलसन्ति। त्रिपञ्चाशत्कवितासु गर्त्त: इत्येका कविता। इमां कवितां समक्षमुपस्थाप्य कविना गर्त्त: इति संग्रहस्यास्य नामकरणं क्रियते। अन्यासु कवितासु काचन कथं न

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

नीयते, इति रहस्यज्ञानाय प्रथमत: गर्त्त: इति कविता अनुध्येया। तद् यथा-

*एकदा सायं काले / तस्य क्रन्दनं श्रुत्वा / मया पृष्ट: / केन पातितोऽस्ति /*

*अस्मिन् सुगभीरे गर्त्ते ? / तेन उक्तम् / अतियत्नेन / दिवा नक्तं मूषिकस्य इव /*

*अन्यस्य कृते / मया उत्खनिता: गर्त्ता:/ आत्मार्थपूरणे। / किन्तु /*

*एकीभूता: निर्वोधास्ते गर्त्ता:/ तेषामन्त:/ मामेव पातयित्वा / आनन्दं लभन्ते।* [५]

दिवारात्रम् अन्यस्य अपकारसाधनाय महता यत्नेन विनिर्मिते गर्त्ते गर्त्तकार: स्वयमेव पतति। यथा मूषिक: खाद्यपदार्थान् अपहृत्य गर्त्तं निर्माय तत्र स्थापयन् एकदा क्षुद्रमरणपिञ्जरे आवद्ध: सन् मृतो भवति। अयमेव साधारण: अर्थ:। परन्तु रहस्योद्घाटने अर्थ: व्यापको भवति। साम्प्रतिकसमाजस्य व्यक्तिचरित्रं विनष्टं भवति। स्वस्य उन्नतये अपरस्य क्षतिसाधनं करोति। इति हेतो: सर्वदैव अन्यस्य कृते गर्त्तं विनिर्माति। परन्तु स: न जानाति, अन्त्ये तस्मिन् गर्त्ते स एव पतित्वा चित्करिष्यति। तस्योद्धरणाय समीपे कोऽपि न स्थास्यति। सम्प्रति समाजे एतादृशी अवस्था परिलक्ष्यते। स्वस्वार्थपूरणाय किञ्चिदपि कर्म कर्त्तुं सर्वे उद्यता: भवन्ति। परिणामे तु केवलं चक्षुनिर्मिल्य क्रन्दन्ति। एवमेव संग्रहस्यास्य अन्यासु सर्वासु कवितासु एवं भाव: परिलक्ष्यते। तत्रान्येषाम् अन्तिमपरिणति: गर्त्त इव निर्णीयते इति धिया संग्रहेऽस्मिन् त्रिपञ्चाशत् कवितासु गर्त्तकविताया: भावमुररीकृत्य ग्रन्थस्यास्य नामकरणं गर्त्त: इत्युपस्थाप्यते।

**(६)शवरी-** कवितासंग्रहोऽयं २००५तमे ख्रीष्टब्दे डा.नारायणदाशेन सम्पादित:, श्रीमतीसवितादासेन प्रकाशितश्च। व्यङ्ग्यमाध्यमेन समाजिककुसंस्कारान् दूरीकरणाय प्राचीनसमाज-स्वरूपस्य पुनरुज्जीवनाय विगतसुचरित्राणां पुनरुद्धरणाय च तपस्या, स्वाधीनता, मात:, नवोढा, विद्या, देवशिशु:, दृष्टि:, यन्त्रणा, अहं क्लान्त:, जयन्ती, कवि:, स्मृति:, पृथ्वी एषा, शवरी-इत्याद्येकत्रिंशत्कविता: संग्रहेऽत्र विलसन्ति। संग्रहेऽस्मिन् स्थितासु एकत्रिंशत् कवितासु शवरी इति कवितां नीत्वा संग्रहस्य नाम शवरी इत्युपस्थाप्यते। यत्र शवरीव्याजेन साम्प्रतिकजनजीवनमत्र चित्रियते। त्रेतायुगस्य पौराणिकभक्ते: विग्रहस्वरूपा शवरी अधुना दारिद्रस्य सीमारेखातले ग्राम्यशवरीणां युगपत् प्रतिनिधित्वं करोति। सा शवरी अतन्द्रभावेन आम्रफलानि संगृह्य तेषां सुमिष्टत्वं संपरीक्ष्य प्रतीक्षां करोति। यतो हि तस्या: सुपुण्यम् आश्रमं राम: आगमिष्यति इति गुरो: उपदेश: आसीत्। सम्प्रति दरिद्रशवर्या: ज्वरेण आक्रान्त: क्षुधाजर्ज्जरित: पञ्चवर्षीय: नप्ता संरक्षितानि सुमिष्टफलानि अखादत्। परमेश्वराय रामाय किं देयमिति सा विचार्य फलानि संग्रहीतुम् अधुना वनं गत्वा तत्र क्रन्दति। यतो हि तया आराधिता: सम्पूजिता: वृक्षा: नगरवासिभि: उत्पाटिता:। केन्दुपत्राणि विक्रीय संरक्षित: धनराशि: वध्वा: परिधानाय व्ययितवती। अत: सा शवरी अतीव चिन्तामग्ना। दारिद्र्येण प्रपीडितानां वनवासिनां कृते जीविकानिर्वाहकरणाय वनम् एकमात्रं पन्था आसीत्। तत: वनजातद्रव्याणि नीत्वा विक्रीय अल्पाकारेण यत् प्राप्नुवन्ति, तै: उदरं

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

पूरयन्ति। सर्वकारस्य प्रोत्साहनं तेषां कृते किमपि नास्ति। प्रोत्साहनं प्राप्तुं केवलं प्रतिश्रूतिः अस्ति। दिनं दिनम् अपेक्षया प्रतिश्रूतिः प्रतिश्रूतित्वेन तथैव विद्यते। तथापि ते अभिलाषिणः सन्ति। तेषां सन्ततयः दारिद्र्यत्वात् खाद्याभावात् स्वच्छजलाभावाच्च अज्ञातरोगेण प्रपीडिताः भवन्ति, एवमेव मृताः भवन्ति च। स्वच्छनीरातमसायाः जलं यन्त्रागारस्य वर्ज्यवस्तुभिः प्रदूषितमस्ति। तथापि प्रतीक्षते शवरी। रामराज्यं भविष्यति। सा रामराज्यप्रतिष्ठायै मतदानं करोति। परन्तु सा पश्यति दलमतनिर्विशेषेण रावणराज्यमेव प्रचलति। तथापि रामराज्याभिलाषाय अपेक्ष्यते शवरी। कवेर्भाषया-

*शवरी अद्य दुःखजर्ज्जरीता/ मुहुर्मुहुः तदेव चिन्तयति/ केन उपहारेण सा स्वागतं करिष्यति,/*

*कं वा पदार्थं पुरस्कृत्य सा अपेक्ष्यमाणा स्यात्/ अनन्तकालाय अस्मिन् जराव्यकुलिते कुटीरे।/*

*जनाः किन्तु तथापि तां बोधयन्ति/श्रीरामः आगमिष्यति/ विश्वार्त्तिहरणाय जीवकल्याणाय/अस्मिन् मार्गे।*[६]

एवमेव विचारसम्बलितोऽयं कवितासंग्रहः। अत्र प्रायः सकलाः कथाः व्यङ्ग्य-वक्रोक्ति-संवेगप्रमुखैः परिपूर्णा। शोषितान् दरिद्रान् प्रति संवेदना, प्रकृतिपरिवेशस्य विनष्टात् क्षुन्नमनसि चिन्ता, पूर्वजेषु श्रद्धा, नारीणाम् आधुनिकरूपचर्य्याः चादयः कवेः प्रियविषयाः अत्र वर्णिताः सन्ति।

(७)**दारिद्र्यशतकम्-** काव्यमिदं कथाभारतीप्रकाशिकासवितादाशेन २०१३तमे ख्रीष्टाब्दे प्रकाशितम्। शतसंख्याकानां कवितानां समाहारेण हास्यव्यङ्ग्यात्मककाव्येऽस्मिन् दरिद्रस्य केवलम् एक एव परिचयः दरिद्रः इति प्रमुखतया उपवर्ण्यते। दारिद्र्यदग्धीभूताः मनुष्याः भाग्यनाम्ना उपहस्यन्ते, कर्मफलशब्देन निर्भत्स्यन्ते, प्रारब्धसान्त्वनया विनिन्द्यन्ते। ते जीवन्तः अपि मृताः भवन्ति। एते मनुष्यभावैः न परिगण्यन्ते। कीटानां स्थानं सर्वत्र विद्यते। परन्तु एतासामधिकारः कुत्रापि नास्ति। अपि च दरिद्रस्य किञ्चिद् वक्तुमपि सामर्थ्यं न भवति। गणतन्त्रभारतवर्षेऽस्मिन् दारिद्र्यान् आश्रित्य नेतारः परिवर्द्धन्ते। कवेर्व्यङ्ग्य उपस्थाप्यते यत् ते नेतारः दारिद्र्यं परमस्नेहेन आत्मीयवत् पुत्रवत् परिपालयन्ति। दारिद्र्यदूरीकरणमिति प्रसङ्गम् अस्त्रं कृत्वा निर्वाचने मतदानं कारयन्ति। पञ्चतारकाभवनेषु दारिद्र्यस्य उन्नतये आलोचनाचक्राणि अनुष्ठीयन्ते। दारिद्र्यं विना जननायकाः वीर्यहीनाः भवन्ति। ते शासकदलीयाः विरोधिनो वा भवन्तु, निर्वाचनरणाङ्गने अवतरितुं न शक्नुवन्ति। पेचकस्य शरीरं यथा सर्वान् न आनन्दयति, स्वशरीरं गोपयति, तथैव दरिद्रः आत्मानं संगोपयति। एवमेव काव्येऽस्मिन् कविना शकुन्तला-अहल्या-वनमल्लिकादिभिः सह दारिद्र्यचरित्रमुपस्थाप्यते। काव्येऽत्र अरक्षितरघु-शवरी-सुदामाप्रभृतीनां पारम्परिकभक्तानां दारिद्र्यविषये स्वकथनं प्रतिपाद्यते। केवलम् आत्मप्रतिष्ठायै दरिद्रपूजनम् उत्तमा सरणी, यत्र कुत्रापि दरिद्रस्य विनाशप्रसङ्गो नास्ति इति कविना निगद्यते। दरिद्राणां प्रतिभूरयं कविः स्वशाणितव्यङ्ग्यमार्गेण व्यङ्ग्यालोकं काव्यमिदं सहृदयहृदयं स्पृशति। दिङ्मात्रमुदाह्रियते यथा-

*प्रातःकालिकपेचक इव /आत्मानं संगोपयति दरिद्रः।/*

*यस्याविर्भावो नैव हर्षयति कमपि/ नापि प्रभवयति मङ्गलाय, तथापि/*

*दैन्यदुःखनिपीडितोऽपमानितो/ लञ्छितोऽसौ /*

*तिष्ठति सर्वेभ्यो दूरे अतिदूरे/कास्मिंश्चित् परिचयविहीने गोपनस्थाने/*

*क्षुधातृषाजर्ज्जरितकायः।*[७]

**(८) अधरमधुरम्-** अष्टादशसंस्कृतव्यङ्ग्यकाथानां संग्रहः ऐषो कथासंग्रहः२०२०सम्वत्सरे प्रकाशितः। अत्र स्वार्थत्यागी न पण्डितः, सुखं हि मिलिते तन्त्रे, श्रीगुरुः शरणं तस्याः, वृक्षमूले हरिश्शेते, भिक्षायाश्चैव चैव च, चातुर्यं कीर्त्तिकारणम्, वञ्चना जयदायिनी, अविश्वस्तः सदाः पतिः, पवित्रं नेतृभाषणम्, पुरस्कारे सदा मतिः, विपणीं लभते बलम्, पीडा न विद्यते दले, सुलभा ईश्वराः कलौ, इण्डियावासिनो धन्याः, सतीत्वं सारमप्राप्ते, सौन्दर्यं प्रतिवेशिन्याम्, न दीनो गणतन्त्रेऽस्ति, क्षम्यतां परमेश्वरी चेति याः कथाः संगृहीताः सन्ति, तासां कथानां शीर्षकेष्वपि व्यङ्ग्यमभिलक्ष्यन्ते। कथासंग्रहस्यास्य कथासु यद्यपि कुत्रापि अधरं मृधुरम् इति शीर्षको नास्ति, तथाप्यस्य एवं नामकरणे याथार्थ्य विद्यते। मधुराधिपतेः अखिलब्रह्माण्डनायकस्य कृते अधरं मधुरम् इति सम्यक अस्ति। परन्तु मर्त्यस्य कस्यापि मानवस्य अधरात् यदि मधुरं झरति, तर्हि निश्चयेन तस्य हृदयं जगतः दुःखेन स्वीयदुःखेन वा परिपूरितमस्ति। सम्प्रति प्रायतो सर्वे जनाः वचस्येकं वदन्ति, कर्मण्येकं पृथग् कुर्वन्ति। जनानाम् अधरेषु मधुरं विद्यते परन्तु तेषां कार्येषु अकार्यंमाचरन्ति। अतएव जनाः मुखात् कथं पुण्यपीयूषवर्षां कुर्वन्ति इति एव संग्रहस्यास्य सर्वासु कथासु अभिलक्ष्यते, इति हेतोः कथासंग्रहस्यास्य नामकरणे अधरं मधुरम् इति शीर्षकः लैखकेन नायकमहोदयेन सुचिन्तितः।

एतदतिक्ताः कोणार्क, रात्रिर्गमिष्यति, तवकथामृतं चेति आधुनिकसंस्कृतसाहित्यमाधारीकृत्य केचन अप्रकाशितग्रन्थाः अपि तिष्ठन्ति। बहवः शोधलेखाः उल्लिखिताः। सर्वपरि वक्तव्यमिदं यत् आधुनिकोत्कलीयसंस्कृतव्यङ्ग्यसाहित्यक्षेत्रे अद्वितीयव्यङ्ग्यसाहित्यिकः डा.प्रमोदकुमारनायकः औपनासिक-कथाकार-कविभावैः महतीं भूमिकामावहति।

**पादट्टीका-**

१.अधरमधुरम्-पृ.१०।
२.उवाचकण्डुकल्याणः -पृ.३२।
३.तत्रैव -पृ.३२।
४. तत्रैव -पृ.३२।
५.गर्त्तः-पृ.३१।

६.शवरी-पृ.३१।

७.दारिद्र्यशतकम्-पृ.१३-१४।

**ग्रन्थसूची-**



| क्र.सं. | ग्रन्थनाम | प्रणेता | प्रकाशक: | सम्बत्सर: |
|---|---|---|---|---|
| १. | अधरं मधुरम् | डा.प्रमोदकुमारनायक: | कथाभारती, कलिकाता | २००० |
| २. | उवाच कण्डुकल्याण: | डा.प्रमोदकुमारनायक: | लोकभाषाप्रचारसमिति:,पुरी | १९९८ |
| ३. | कथासप्तति: | डा.प्रमोदकुमारनायक: | लोकभाषाप्रचारसमिति: | २००३ |
| ४. | गर्त्त: | डा.प्रमोदकुमारनायक: | लोकभाषाप्रचारसमिति:,पुरी | १९९८ |
| ५. | दारिद्र्यशतकम् | डा.प्रमोदकुमारनायक: | कथाभारती | २०१३ |
| ६. | शवरी | डा.प्रमोदकुमारनायक | श्रीमतीसवितादाश | २००५ |
| ७. | स्वर्गपुरे | डा.प्रमोदकुमारनायक: | श्रीमतीसवितादाश | २०१२ |
| ८. | स्वर्गादपिगरीयसी | डा.प्रमोदकुमारनायक: | लोकभाषाप्रचारसमिति: | २००२ |

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

# संस्कृतेऽनूदितसाहित्यपरम्परा - ललितलवङ्गलतेति अनूदितगद्यप्रबन्धश्च

सिलिस्वप्ना साहु
राष्ट्रीय संस्कृत विश्वविद्यालयः
तिरुपतिः ,आन्ध्रप्रदेशः

वद् धातो: घञि प्रत्यये कृते सति 'वादः' इति पदं निष्पद्यते। वाद: इति पदेन च 'अनु' उपसर्गयोजनेन 'अनुवादः' इति पदस्य निष्पत्तिः। अनुवादं नाम कस्माञ्चित् परं कथनम् अथवा पुनर्कथनम्।

ब्राह्मणग्रन्थेषु पुनर्कथनमित्यर्थे अनुवादशब्दस्य प्रयोग: बहुधा प्राप्यते । ऐतरेयब्राह्मणे उक्तमस्ति- **'यद्वाचि प्रोदितायाम् अनुब्रूयाद् अन्यस्यैवैनम् । उदितानुवादिनम् कुर्यात् ।**[1]

यास्कस्य निरुक्ते कालानुवाद परीत्य[2] इति अनुवादविषये उक्तम् । निरूक्ते एव आवृत्यर्थमनुवादशब्दस्य प्रयोग:- **'एतद् ब्राह्मोणेन रुपसम्पन्न विधीयते इत्युदितानुवादः संभवति।**[3]

पाणिने: अष्टाध्यायी इति ग्रन्थेऽपि अनुवादशब्दस्य प्रयोग: प्राप्यते **-'अनुवादे चरणानाम्'।**[4] अनुवादे चरणानाम् इत्यत्र प्रयुक्तस्य अनुवाद इति पदस्य व्याख्या भटटोजिदीक्षितेन सिद्धस्य उपन्यासे इति रुपेण विहिता । सूत्रेऽस्मिन् महाभाष्यकारोक्तकथनस्य टीकायां कैय्यटोऽभिदधाति- यदा प्रतिपत्ता प्रमाणान्तरावगतमप्यर्थ कार्यान्तरार्था प्रयोक्ता प्रतिपाद्यते तदानुवादो भवति'। काशिकायामपि अस्यैव सूत्रस्य टीकायामुक्तं वर्तते- **'प्रमाणान्तरावगतस्थार्थस्य शब्देन संकीर्तनम् अनुवादः'**[5]**।**

सामान्यतया विद्वद्भिः कथ्यते यत् अनुवाद: तादृशी प्रक्रिया वर्तते यया एकस्यां भाषायां व्यक्तविचाराः इतरभाषायाम् अस्माभिः व्यक्तीक्रियन्ते।

**अनुवाद-प्रक्रिया**

भाषायाः मूलम् उद्देश्यं तावत् विचाराणां व्यक्तीकरणम् एवञ्च अनुवादस्य उद्देश्यं एकभाषात: अपरभाषायां विचाराणाम् अभिव्यक्तिः। अनुवाद प्रक्रियायां यस्याः भाषायाः अनुवाद: विधीयते सा स्रोतभाषा एवञ्च यस्यां भाषायां अनुवादः विधीयते सा लक्ष्यभाषा भवति । डा० गार्गी-गुप्त-महोदयेन कथितं यत् अनुवादप्रक्रियाया: द्वे मुख्ये अङ्गे भवत:- अर्थबोध: व्याकरणसम्मतभाषायां स्पष्टसम्प्रेषणञ्च । एतदर्थम् अनुवाद: द्विमुखी भवति, मूल रचनाकारं प्रति अर्थबोध दृष्ट्या पाठकं प्रति शुद्ध एवं सुबोध सम्प्रेषण दृष्ट्या च।[6]

डा. भोलानाथ तिवारी-महोदयेन अनुवादस्य प्रक्रिया विषये उक्तम्- 'अहं स्वयमेव अनुवादप्रक्रियाया: पञ्चचरणानि मन्ये । वस्तुतः अनुवादकरणवेलायां मया स्वयमेव अनुभूतं यत् स्पष्टत: अथवा अस्पष्टत: अनुवादकैः पञ्चचरणेभ्यः गम्यते । पञ्चचरणानि तावत् -

1. पाठस्य पठनम्
२. पाठस्य विश्लेषणम्
3. भाषान्तरणम्
4.समायोजनम्
5. मूलेन सह तुलना।[7]

---

[1] ऐतरेय ब्राह्मणम् २.१५
[2] निरूक्तः १२.१३
[3] निरूक्तः १.१६
[4] अष्टाध्यायी २.४.३
[5] काशिका २.४.३
[6] अनुवाद के विविध आयाम-डा० पूरनचन्द्र टण्डन
[7] अनुवाद विज्ञान- डा० भोलानाथतिवारी पृ०-४९

**संस्कृतेऽनूदितसाहित्यपरम्परा-**

संस्कृतभाषायां प्रारम्भे न काचित् सुव्यवस्थिता अनुवाद परम्परा दृश्यते, यतो हि संस्कृतं सर्वासां भाषाणां जननी वर्तते । सर्वविधज्ञानविज्ञानराशयः वेदाः, इतिहासग्रन्थाः, रामायणम्, महाभारतम्, नीतिग्रन्थाः, आयुर्वेदीय ग्रन्थाः, दर्शनशास्त्र ग्रन्थाः इत्यादयः सर्वे एव संस्कृतभाषायाम् उपनिबद्धाः । एतदर्थम् इतरभाषीयग्रन्थाः इतरभाषाष्वनूदिताः न संस्कृते ।

विविधभाषासु रचितानाम् उत्कृष्टसाहित्यानां संस्कृतभाषायाम् अनुवादकरणस्य प्रवृत्तिः प्रायः शताब्देः पूर्वमेव आरब्धा । अन्यभाषया समं संस्कृतेऽपि अनूदितरचनाः द्विप्रकारका : दृश्यन्ते । प्रथमं तावत् कस्याश्चित् रचनायाः पूर्णतया अनुवादः द्वितीयञ्च रचनायाः कस्यचिदंशस्य अनुवादः।

आधुनिककाले विभिन्न भारतीयभाषासु वैदेशिकभाषासु च रचितानां काव्यानां संस्कृतभाषायाम् अनुवादकरणस्य प्रवृत्तिः प्राचलत्। 'संस्कृत वाङ्मय का बृहद् इतिहास' इति ग्रन्थस्य सप्तम खण्डे सम्पादकेन अनूदित रचनानां सूची प्रदत्ता विद्यत्ते, तदधोलिखिततया वर्तते-

- एम. ओ. आवरा द्वारा विरचितस्य मूलतया मलयालमकाव्यस्य 'महात्यागी' इति नाम्ना श्री के. पी नारायण पिषारोटीकृतः संस्कृतानुवादः ।
- उमर खैयाम इत्यस्य रूबाइयां इत्येतेषाम् ‘अमरसूक्तिसुधाकर’ इति नाम्ना पं. गिरिधर शर्मणा कृतः संस्कृतानुवादः ।
- वी. सुब्रह्मण्य-अय्यर इत्यनेन आङ्ग्लभाषया विरचितकाव्यानां संस्कृतानुवादः ‘पद्मपुष्पाञ्जलिः’ इति शीर्षकेण निहितः।
- मराठी कविना मोरो पन्त इत्यनेन विलिखितायाः कवितायाः संस्कृतानुवादः गीर्वाणकेकावली' इति नाम्ना कृतः ।
- रवीन्द्र नाथ टैगोर इत्यनेन बाङ्ग्ला भाषायां विरचितकाव्यानां फटिकलाल दासेन संस्कृतपद्यानुवादः विहितः।
- तमिल भाषायां विरचितायाः 'तिरुक्कुरल' इति मुक्तककाव्यरचनायाः अप्पा वाजपेयी द्वारा श्री सुनीतिकुसुममाला' इति नाम्ना काव्यानुवाद : समुपस्थापितः।
- तमिलकवेः औव्बई इत्यस्य कवितायाः संस्कृतानुवादः वाई महालिङ्ग-शास्त्रिणा द्रविडार्यसुभाषितसप्तति' इति नाम्ना कृतः ।
- तेलुगुभाषायां विरचितानां तेलुगुशतकः, सुमतिशतक, वेमनशतक, दाशरथिशतक, कृष्णशतक, भास्करशतक इति शतकानां संस्कृतानुवादः विहित।
- श्री अरविन्दस्य काव्यानां टी.वी. कपालि-शास्त्रिणा ‘कविताञ्जलिः’ इति नाम्ना कृतः संस्कृतानुवादः ।
- रघुनाथ चौधरिणा असमिया भाषायां विलिखितस्य काव्यस्य ‘केतकीकाव्यम्’ इति नाम्ना पं. मनोरञ्जनशास्त्रिणा अनुवादः कृतः ।
- मलयालम कविना कुमारन् आशान् इत्यनेन विरचितकाव्यस्य एन. गोपाल पिल्लई द्वारा ‘सीताविचारलहरी’ इति नाम्ना संस्कृतानुवादः समुपस्थापितः।
- बिहारी सतसई इत्यस्य संस्कृतानुवादः प्रेमनारायण-द्विवेदिना ‘सौन्दर्यसप्तशती’ इति नाम्ना विहितः । अस्यैव संस्कृतानुवादः परमानन्दशास्त्रिणा अपि ‘श्रृंगारसप्तशती’ इति नाम्ना कृतः।
- मिल्टन, ब्लैक, कीट्स, वर्डसवर्थ, टेनीसन इत्यादिभिः आङ्ग्लकविभिः विरचितकाव्यानि डा० गोविन्दचन्द्रपाण्डेय इत्येनेन संस्कृतेऽनूदितानि।

आधुनिकैः संस्कृतज्ञैः न केवलं, पवित्र ‘बाइबिल’ आदयः ख्रिस्तीया धार्मिकाः ग्रन्थाः संस्कृते ऽनूदिताः परं पवित्र

'कुराण' इत्यस्यायि संस्कृते ऽनुवाद कृतः। डॉ. वनेश्वरपाठकैः ‘यीशुचरितम्’ इति नाम्ना 'बाइबिल-न्यू टेस्टामेण्ट इत्यस्य संस्कृतपद्यानुवादः 1989 वर्षे राञ्चीतः प्राकाश्यं नीतः । इतोऽपि पूर्वं आचार्यैः धर्मेन्द्रनाथमहाभागैः "सादिन : पुष्पलोकः इति नाम्ना 'गुलिस्ताने सादी' नामा प्रसिद्धः पारसीको ग्रन्थः अनूदितः।

संस्कृत वाङ्मय का बृहद् इतिहास' इति ग्रन्थस्य पञ्चम खण्डे प्रो. जयमन्त मिश्रेण संस्कृते ऽनूदितानां कथानां सूचि प्रदत्ता-

- गोविन्द कृष्ण मोडकः - चोरचत्वारिंशीकथा (अरेबियन नाइट्स इति कथानां संस्कृतानुवादः)।
- कृष्ण सोमयाजी - कणः लुप्त : गृहं दहति (अ स्पार्क नेगलेक्टेड वर्न्स द हाउस नाम्नः टाल्स्टायकृताङ्ग्लनाटकस्य संस्कृतानुवादः।)
- हारिचरण-भट्टाचार्यः- कपालकुण्डला (बंकिमचन्द्रस्य सुप्रसिद्धस्य बाङ्ग्ला नाटकस्य अनुवादः।)
- एस वेङ्कटरामशास्त्रिः कथाशतकम् (भारतस्य प्रादेशिक भाषासु रचितानां शतकथानां संस्कृतानुवादः)
- जगन्नाथः -कथामञ्जरी (पाण्डिचेरीस्थस्य अरविन्दाश्रमस्य श्री माता द्वारा फ्रेंचभाषायां विलिखितस्य नीतिकथानां संस्कृत रुपान्तरणम्)
- एम. अहमद - दुखोत्तरं सुखम्( जाने उल्लिका यान नाम्नः फारसी कथासंग्रहस्यानुवादः)
- श्रीधरः- कथाकौतुकम् (युसुफ जुलेखा च नाम्नोः फारसीकथयोः संस्कृतानुवादः)
- एन. गोपाल पिल्लई- सीताविचारलहरी (मलयालमभाषया विरचितकथायाः अनुवादः)

एतदतिरिच्य मराठी, कन्नड़, गुजराती. ओड़िआ इत्यादिषु भाषासु रचितानां साहित्यिक ग्रन्थानामपि संस्कृतभाषया अनुवादः विहितः । काश्चन अनूदित रचनाः अधोलिखिताः सन्ति

**मराठी भाषातः संस्कृतेऽनूदितसाहित्यम्-**

प्रो. विमल लेले इत्यनेन मराठी भाषायाः प्रसिद्धगीतानि अनूद्यः ’अथ स्वागतम्' अभिधेयं काव्यग्रन्थः विरचितः। अनेनैव मराठीभाषायाः राजा बढे कविना विलिखितं भावगीतं 'चांदणे शिंपीत जाशी चालता तू चंचले' 'चन्द्रिकां ननु सिञ्चसि त्वं चरणयो निःक्षेपणे 'इति नाम्ना अनूदितम् ।

डॉ. देवी प्रसाद खरवण्डीकर इत्यनेन गजानन दिगम्बर माडगूळकर द्वारा रचितानि बाळनो श्रीरामायण, दैवजात दुःखे भरता दोष ना कुणाचा इत्यादिनी मराठीगीतानि संस्कृतेऽनूदितानि।

**कन्नड़भाषातः संस्कृतेऽनूदितसाहित्यम्-**

कुवेम्पु कवि द्वारा रचितस्य ’रामायणदर्शन' इत्यस्य प्रो. सी.जी. पुरुषोत्तमेन 'श्रीरामायणदर्शनम्' इति नाम्ना संस्कृतानुवादः विहितः। डॉ. एस. एल. भैरप्पा इत्यस्य' 'धर्मश्री' इति नाम्नः उपन्यासस्य जनार्दन हेगडे इत्यनेन अनुवादः विहितः ।

**गुजराती भाषातः संस्कृतेऽनूदितसाहित्यम्** –

ना गुर्जरी, जसमा ओडणम्, महासती तोकलम्, होथल पद्मिनी इत्यादिलोककथानां संस्कृतानुवादः नूतननाट्यप्रस्थानम् एवं नूतन-नाट्य.कौमुदी इति ग्रन्ये कृतः ।

**ओडिआभाषातः संस्कृतेऽनूदितसाहित्यम्-**

ओडिआभाषायां पंडित गोपबन्धुदासेन विरचितस्य ’बन्दिर स्वदेशचिन्ता’ इत्यस्य ’बन्दिनः स्वदेशचिन्ता’ इति नाम्ना पं० प्रबोधकुमारमिश्रेण विहितः संस्कृतानुवादः प्रामुख्यं भजते। तथैव ओडिआ भाषायाः कविना राधानाथरायेण विरचितायाः ”चिलिका’ इति कवितायाः संस्कृतानुवादः क्षीरोदचन्द्रदाशेन विहितः। ओडियाभाषायां गंगाधरमेहर इत्यनेन विरचितस्य 'तपस्विनी' इति काव्यस्य संस्कृतानुवादः हरेकृष्ण मेहर इत्यनेन विहितः । अनेनैव राधानाथ रायविरचितस्य 'वर्षा' इति ओडियाभाषीयस्य पद्यस्य संस्कृतानुवादः कृतः ।

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume: 01 | Issue: 02 | Jun-Aug 2024 | www.thebrahmi.com

**ललितलवङ्गलताख्यः अनूदितगद्यप्रबन्धः -**

इमामेव सरणिमनुसरन् उत्कलसाहित्यजगति उपन्यासकारत्वेन लोकविश्रुतेन ब्रजमोहनमहान्तिमहाभागेन विरचितस्य 'ललितलवङ्गलता' इति जीवनमूलकोपन्यासस्य संस्कृतानुवादः डा. सोमनाथदाशमहोदयेन विहितः ।

प्रबन्धस्यास्य नामकरणं श्रीगीतगोविन्दस्य अष्टपदीतः एकस्य गीतस्य प्रथम चरणात् स्वीकृतेनैकेन पदेन कृतमस्ति-

**ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे**
**मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे ।**
**विहरति हरिरिह सरसवसन्ते,**
**नृत्यति युवती जनेन समं सखि विरहिजनस्य दुरन्ते।।**

प्रामुख्येन शान्तरसाभिव्यञ्जकेऽस्मिन् गद्यप्रबन्धे उत्कलस्य संस्कृतिः, सभ्यता, प्राचीननौवाणिज्यपरम्परा, मन्दिरनिर्माणकारुकला, प्रभञ्जनादिदैवदुर्घटना, श्रीक्षेत्रस्य पवित्ररथोत्सवः, स्नानोत्सवः, अल्वारनाथदर्शनमाहात्म्यम्, देवदासीप्रथा, श्रीमाधवसंस्कृतिः, तात्कालिकबौद्ध-जैन-शाक्त-वैष्णव-शैवानां मतभेदः, विविधतीर्थक्षेत्राणां वैशिष्ट्यम्, श्रीक्षेत्रं परितः विद्यमानानां दर्शनीयस्थानानां परिचितिः, नरेन्द्रपुष्करिणी-इन्द्रद्युम्नपुष्करिणीपरिचितिः, तारातारिणीक्षेत्रस्य ऐतिहासिकपृष्ठभूमिः, गञ्जामजिल्लायाः ऋषिकुल्यानदी, पुरीक्षेत्रस्य वाङ्कीमुहाणीनदी, वृन्दावनस्य यमुनानदी, जावासुमात्रादिदेशैः सह वाणिज्यम्, प्रकृतेः अनुपमवर्णना, मानवीयजीवनस्य मूल्यबोधः, प्रथा, परम्परा, लोकवादः, भगवद्भक्तिः इत्यादयः अनेके विषयाः समुपवर्णिताः। दशसु भागेषु विभक्ते संस्कृताऽनूदितेऽस्मिन् गद्यप्रबन्धे प्रधानतया श्रीजयदेवस्य सम्पूर्णजीवनचरितमेव समुपस्थापितम् । तत्र श्रीजयदेवस्य पद्मावत्या सह मेलनं, श्रीगीतगोविन्दस्य रचना, तस्य प्रचारः, जयदेवस्य लक्ष्मणसेनसभापण्डितत्वेन नियुक्तिः, तत्र पद्मावत्याः देहान्तः, श्रीजयदेवस्य वृन्दावनगमनम्, वृन्दावने च मोक्षः इत्यादिविषयाः वर्णितास्सन्ति। संस्कृतेऽनुदितोऽयं गद्यप्रबन्धः सर्जनात्मककृतिषु प्रमुखं स्थानमावहति।

**उपसंहारः -**

उत्कलेष्ववाप्तमहानादरस्य, ओडिशाबुक्स्टोर इति संस्थया प्रकाशितस्य ललितलवङ्गलताख्योपन्यासस्य गीर्वाणगिरा प्रकाशनेन सहृदयाः श्रीजयदेवस्य जीवनचरितसम्बद्धान् श्रीगीतगोविन्दस्य माहात्म्यसम्बद्धान् च विषयान् ज्ञातुं प्रभवेयुः इति विचार्यैव सुरभारतीसमुपासकेन सोमनाथदाशमहाभागेन अस्य संस्कृतरूपान्तरणं समुपस्थापितम् ।

एते संस्कृतेऽनूदितसाहित्यिकग्रन्थाः संस्कृतभाषायाः प्रचार-प्रसारे नितरामुपकुर्वन्ति। आधुनिकसंस्कृतसाहित्यविकासे एतादृशस्य साहित्यस्य योगदानं न किञ्चिन्न्यूनमस्ति यतो हि अनूदितमिदं प्रभूतमपि साहित्यं साहित्यस्य श्रीवृद्ध्यै समपेक्ष्यत एव।

**शोधप्रबन्धानां सूची-**

1. मिनतिलता साहु “उत्कलगौरवकाव्यस्य समीक्षात्मकमध्ययनम्” इति विशिष्टाचार्यलघुशोधप्रबन्धः डॉ सत्यनारायण आचार्यः मार्गदर्शने (२०१०-२०११) संवत्सरे कृतः, राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।

**सहायकग्रन्थसूची**

1. गीतगोविन्दम आचार्य नारायणराम, प्रकाशक – निर्णयसागर प्रेस, मुम्बई – १९५४
2. ललितलवङ्गलता – अनुवादकः - डा. सोमनाथदाश, चौखम्बा संस्कृत प्रतिष्ठान
3. ललितलवङ्गलता -डा. व्रजमोहन महान्ति – प्रकाशक – ओडिशाबुक्ष्टोर
4. पुरुषोतम श्रीजगन्नाथ संस्कृति -परमानन्द त्रिपाठी, प्रकाशक – फ्रेण्डस पब्लिशर्स, कटक
5. भारतीय संस्कृतिरे देवी ओ देवता महिमा -डा. त्रिनाथ पट्टनायक- मा शारदा पब्लिकेशन्स, कटक

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume:01|Issue:02| Jun-Aug2024|www.thebrahmi.com

# प्रणतिपञ्चाशिकायां भगवच्चेतना

Nakul Kumar Sahoo
Research Scholar,
Utkal University, Vani Vihar, Bhubaneswar

## शोधसार

साम्प्रतिककाले संस्कृतकाव्यनिर्माणक्षेत्रे ये केचन मूर्धन्यधीमन्त: काव्यकारा: निरन्तरकर्मतत्परा: दृश्यन्ते तेषु प्रो. सुवासचन्द्रदाशमहोदया: स्वतन्त्रस्थानमलंकुर्वन्ति । तेन पञ्चाशत्-श्लोकपरिमितं प्रणतिपञ्चाशिकाकाव्यं विरचितम्। नीलाद्रिनाथाय श्रीजगन्नाथाय प्रणतिनम्रतया भक्तिनिवेदनं कृतम्। २०११ तमे वर्षे श्रीपंचमितिथौ काव्यमिदम् अङ्किताग्राफिकस-भुवनेश्वरत: प्रकाशितम्। श्रवणकीर्तनादिषु नवविधभक्तिषु वन्दनं भवति ईश्वरकृपाप्राप्तये श्रेष्ठोपायम्। एतेन भक्तवत्सल-श्रीजगन्नाथस्य अपारकरुणाम् अनायसेन प्राप्यते। सच्चिदानन्द-पूर्णब्रह्म: शून्यपुरुष: श्रीजगन्नाथ: सकलजगत: स्रष्टा:। स: चतुर्दशभूवने सकलजरायुज-स्वेदज-उद्भिदज-अण्डजचतुर्विध-भूतशरीरे चेतनतत्त्वरुपेण विद्यते। न केवलं भारतभूमौ अपितु समग्रविश्वे श्रीजगन्नाथचेतना दरिदृश्यते। काव्येऽस्मिन् पौराणिकमाख्यानमुपस्थापनपूर्वकं मीनकूर्मादिदशविधरूपम्, अवतारिपुरुषश्रीकृष्णस्य लीलां, श्रीजगन्नाथतत्त्वं, भगवच्चेतनाञ्च वर्णितमस्ति। अस्य शोधपत्रस्य लक्ष्यं भवति भगवच्चेतनोपस्थापनम्। अयं विषय: गवेषकाणां कृते श्रीजगन्नाथसंस्कृत्यनुसंन्धाने सहायकं भवातीति आशास्यते।

**कूटशब्दा:** - श्रीजगन्नाथ:, चेतना, भक्ति:, सृष्टि: ।

## उपक्रम:

कवयति वर्णयतीति विग्रहात् कवि: शब्द: कवृवर्णने इतिधातो: इ प्रत्ययेन निष्पद्यते। अस्य शब्दस्य प्रयोग: सर्वादौ ऋगवेदस्य अग्निसूक्ते प्राप्यते यथा- "अग्निर्होता कविक्रतु: सत्यश्चित्रश्रवस्तम:। देवो देवेभिरागमत:।।"[1] पुनश्च पंचममण्डले यथा-"आ सूर्यो यातु सप्ताश्व: क्षेत्रं यदस्यो विर्या दीर्घयाये। रघु: श्येन: पसयदन्धो अच्छा युवा कविदीदर्योषु गच्छन्।।"[2] शुक्लयजु: वेदे वर्ण्यते यत्- कविर्मनीषी परिभू: स्वयम्भु।[3] कवि: भवति क्रान्तदर्शी । ब्रह्मा यादृशी भौतिकसंसारस्य निर्माता तादृशी कवि: सारस्वत-काव्यसंसारस्य स्रष्टा।[4] स: अतीतादि कालस्य द्रष्टा अपि भवति। अत: उच्यते - ऋषिस्तु किल दर्शनात् । प्रतिभा-व्युत्पत्ति-अभ्यास शक्तिवलेन काव्यं सर्जयति ।[5] अत: कविकाव्ययोर्मध्ये: भवति जन्यजनकसम्बन्धं वर्त्तते । अत: उच्यते-

"अपारे काव्यसंसारे कविरेव प्रजापति:
यथा वै रोचते विश्वं तथेदं परिवर्त्तते ।।"[6]

कवि: स्वजीवनस्य अनुभूतिं तथा समाजस्य वास्तवचित्रं प्रतिपादयति काव्ये। अत: किं नाम काव्यम्? कवे: कर्म काव्यमिति उच्यन्ते विद्वांस:। रस-अलंकार-छन्द-गुणरीत्यादिमनुसृत्य काव्यस्य निर्माणं भवति। अस्य लक्षणप्रसङ्गे दर्पणाकारविश्वनाथकविराजेनोक्तं वाक्यं रसात्मकं काव्यमिति[7] । पंडितराजजगन्नाथमतेन "रमणीयार्थप्रतिपादक: शब्द: काव्यमिति"[8]। पुनश्च "शब्दार्थौ सहितौ काव्यमिति"[9] काव्यालंकारे। संस्कृतकाव्यजगति गीतिकाव्यस्य महत्वपूर्णमवदानमस्ति। वैदिककालादारभ्य: एतावत्पर्यन्तं गितिकाव्यपरम्परा अखण्ढप्रवाहेन प्रवाहिता। ऋग्वेदस्य अग्नि-इन्द्रादिसूक्तेषु गीतिकाव्य शैली प्रतिपाद्यते। यथा हिरण्यगर्भसूक्ते प्रत्येकमन्त्रस्य अन्तिमपादे "कस्मै देवाय हविषाविधेम"[10] इतिमन्त्रांश: कालिदासभारव्यादिकविनां कृते गीतिकाव्यस्य निर्माणक्षेत्रे सहायकं भवति ।

गीतिकाव्यं द्विविधम् । यथा-१.श्रृङ्गारपरकम् (EROTIC LYRICS), २.भक्तिपरकम् (RELIGIOUS LYRICS) च। श्रृङ्गारपरकगीतिकाव्ये शृङ्गाररसस्य प्राधान्यमस्ति। अत्र नायकनायिकायो: मध्ये प्रेमविरहादिभावना तथा नदी-पर्वत:-ऋत्वादिप्राकृतिकसौन्दर्यस्य वर्णनं भवति। परन्तु भक्तिपरककाव्ये स्तोत्रकाव्ये वा शान्तरसस्य प्रयोगं भवति। अत्र देवता-आचार्य-नदीतीर्थादिनांवन्दनपूर्वकं भक्तिवैरागादितत्त्वस्य संयोगं भवति। प्रणतिपञ्चाशिकाकाव्यमस्ति भक्तिपरकं काव्यम्।

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume:01|Issue:02| Jun-Aug2024|www.thebrahmi.com

### १. काव्यकारस्य देशकालकृतयः

प्रो. सुवासचन्द्रदाशमहोदय: न केवलम् उत्कलप्रदेशे अपितु समग्रे विश्वेऽस्मिन् ख्यातिलब्ध: पण्डित:। विविधदर्शन-साहित्य-पालिप्राकृत्यादिभाषा-पाण्डुलिप्यादिगवेषणाक्षेत्रे तस्य महत्त्वपूर्णमवदानमस्ति। आजीवनं साहित्यसाधनया ते विविधेभ्य: प्रतिष्ठितेभ्य: अनुष्ठानेभ्य: सम्मानिता: भवन्ति। तेन अनेका: काव्यकविताशोधप्रबन्धा: विरचिता:। यथा- परिचय:, प्रणतिपञ्चाशिका, प्रतिध्वनि (ओडिआ-काव्यम्), Gangesa on Yogaruddhi, Bibliography of Pali and Buddhism, Nyāya Theory of Language, The yoga Philosophy: Tradition & Reflection, TeologiSosial, A Navya- Nyaya Discussion on the meaning of the Negative Particle Non: A study of the Nanvadakarika of Udayana च । एतद् सहितम् अनेकानि संपादितानि काव्यानि सन्ति। यथा- योगज्योति:, वाणीज्योति:, काव्यसंजीवनी, प्रत्यभिज्ञादर्शनम्, Man-Lion Myth in Sanskrit & Odia Purans इत्यादय:।

### २.प्रणतिपञ्चाशिकायां भगवच्चेतना

आधिदैविक-आध्यात्मिक-आधिभौतिकदु:खत्रयेभ्य: रक्षार्थं सर्वेमानवा: मणिरत्नादिधारणं कुर्वन्ति, परन्तु दु:खस्य आत्यन्तिकं निवृतिं नैव भवति। अस्य दूरिकरणाय श्रीजगन्नाथस्य नाम स्तवनं केवलं कारणम्। प्रणतिपञ्चाशिकाकाव्ये भगवच्चेतनाया: अनेका: स्वरूपा: विद्यन्ते। तेषु परमपुरुषयोगाधिराजश्रीकृष्णस्य दशावतारस्वरूपम्, भक्तस्य निवेदनम्, तस्य माहात्म्यम्, अनुग्रहभिक्षादिविषये कवि: अतिसुन्दररूपेण वर्णनं करोति।

### २.१ शून्यपुरूष: श्रीजगन्नाथ:

द्वापरयुगादनन्तरं संप्रति कलियुगं प्रचलति। युगेऽस्मिन् भगवान्दारुब्रह्मरूपेणभूमण्डलेअवतरति।कवि: काव्यस्य प्रारम्भिके श्लोकेश्रीजगन्नाथंदारुवर्ष्मा, गिरिमहापुरुष: इतिनाम्ना सम्भोध्यते च। तस्य शून्यरूपस्य तथा च पूर्णसाकाररूपस्य वर्णनंकरोति यथा-

“नो कर्णौ यस्य पाणी न न पदयुगलं नैव नासापुटे वा
श्रोतुं दातुं च गन्तुं तदपि स कुतुकी श्रीघ्रमाघ्रतुमुत्क:।
वृत्ताक्षिव्यात्तदृष्ट्याधरदलविलसद्धासवृष्ट्यापि सृष्ट्या:
कुर्यान्निष्टानि कष्टान्यसितगिरिमहापूरुषो दारुवर्ष्मा।।”[11]

चतुर्धामेषुविश्वप्रसिद्ध: श्रीजन्नाथधाम: उत्कलप्रदेशस्य पुरीप्रान्ते अवस्थित:। अस्य अपरं नाम भवति शंखक्षेत्र:, पुरुषोत्तमक्षेत्र: । श्रीजगन्नाथ: भ्रत्रा श्रीवलभद्रेण तथा सुभद्राभगीन्यां सह रत्नसिंहासने विराजते। स: शून्यपरुष: परंब्रह्म:। कारणं अस्य विग्रहस्यकर्णद्वयं, करद्वयं, पदयुगलं, नासिका च न सन्ति। मानवलीलां संपादनार्थं स: सकलजनस्य प्रार्थनां श्रवणं करोति, भक्तजनाय अभिष्टफलं प्रददाति, चतुर्दशभूवनस्य भ्रमणं अनायासेन करोति, सुस्वादुव्यञ्जनस्य आघ्रणं करोति। स: वृत्ताक्षिव्यात्तदृष्ट्या चराचरजगतं पश्यति। सूर्यचन्द्रौ तस्य नेत्रे एवं च हासवृष्ट्या अमृतं वर्षयति पृथिव्याम्।[12]

### २.१ पूर्णब्रह्म: श्रीजगन्नाथ:

हस्तपदादयशून्य: भक्तवत्सल: श्रीजगन्नाथ: पूर्णपुरुष: पूर्णब्रह्म:। सत्-चित-आनन्दं तस्य स्वरूपम्। उपनिषदि वर्ण्यते यत्-

“पुर्णमद: पूर्णमिदं पूर्णाद् पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।।”[13]

सकलजीव: तस्य अंशरूपेण संसारेऽस्मिन् जन्मलाभं करोति। स: तु अंशी स्वयम्। अत: सकलसंसार: अपि पूर्णम्। एकोऽहं बहुस्याम् इति भावनया स: जगतोत्पन्नं करोति। स: वेदवेदान्तवन्द्य: परमानन्दस्वरूपम्, लीलामयी निरञ्जन:।[14]

### २.२ जगत: स्रष्टाश्रीजगन्नाथ:

परंब्रह्मपुरुषोत्तम: श्रीजगन्नाथ: सर्वव्यापक: अखिलब्रह्माण्डस्य स्वामी भवति। अत: अखिललोकनाथरूपेण तं सम्बोध्यते।[15]

The Brāhmī, International Multidisciplinary Research Journal
(Peer Reviewed, Referred & Open Access Journal)
Volume:01|Issue:02| Jun-Aug2024|www.thebrahmi.com

तस्मात् इयं सृष्टि: उत्पद्यते। एतद् विषये तैतिरीयोपनिषदि वर्ण्यते यत्-"यतो वा इमानि भूतानि जायन्ते"[16] इति। चतुर्दशभूवनस्योत्पत्ति विषये श्रीमद्भागवतमहापुराणे उल्लिख्यते यथा-

"तत्कटयां चातलं क्लृप्तमूरुभ्यां बितलं विभो:।
जानुभ्यां सुतलं शुद्धं जंघभ्यां तु तलातलम्।।
महातलं तु गुल्फाभ्यां प्रपदाभ्यां रसातलम्।
पातालं पादतलत इतिलोकमय: पुमान्।।
भूर्लोक: कल्पित: पद्भ्यां भुवर्लोकोऽस्य नाभित:।
स्वर्लोक कल्पित: मूर्ध्ना इति वा लोक कल्पना।।"[17]

भगवान् स्वयं जगत: धारणकर्त्ता, कर्मफलदाता, पिता,माता, पितामहश्चेति। अत: गीतायामुच्यते-

"पितामहस्य जगतो माता धाता पितामह:।।" [18]

जरायुजस्वेदज-उद्भिदज-अण्डजचतुर्विधभूतशरीरे श्रीजगन्नाथ: चेतनतत्त्वरूपेणविद्यते। कारणं चेतनत्त्वमस्य लक्षणम्। स: सर्वज्ञ: सर्वशक्तिमान्। समस्तप्रपञ्चस्य नियामक:, अतीतानागतवर्त्तमानकाले स्थितपदार्थस्य उत्पति-स्थितिनाशादिविषये ज्ञानेच्छाकृतिमान्सर्वज्ञ: सुखदु:ख-धर्माधम-पापपुण्यभावश्च परिलक्ष्यन्ते। अत: काव्येऽस्मिन् वर्ण्यते यत्- "समर्चनीय: कृतसर्वसृष्टि:"[19] इति।

**२.३ समन्वयभावना :-**

दारूब्रह्मश्रीजगन्नाथ: सर्वेषां कृते उदारवृत्तिं समानदृष्टिं समभावं समाननीतिञ्च आचरति। यदा भक्त: भक्तिभावनया श्रीजगन्नाथं स्मरति तदा भक्तवत्सल: श्रीजगन्नाथ: तं दर्शनं ददाति। शुभमङ्गलकार्यारम्भे अनिष्टपरिहाराय, समरप्राङ्गणे उभयपक्षस्य योद्धा: विजयार्थं, प्रतिकूलावस्थाया: उद्धरणाय च सर्वेजना: अखिलब्रह्माण्डस्य स्वामीr श्रीजगन्नाथं स्मरति। स पुरुषोत्तम: सर्वेषां कृते समानदृष्टिनिक्षेपं करोति। उदारवृत्तिमाचरति तथा च समाननीतिम् अवलम्बनं करोति। अत: काव्येस्मिऽन् वर्ण्यते-

"समानदृष्टि: समभावपुष्टि:
समननीति: समताप्रणीति:।
एते समस्ता: सुगुणा: सुलभ्या-
स्त्वयीष्टमूर्त्तौ समुदारवृत्तौ।।"[20]

**२.४ दशावतारवर्णनम् :-**

असिन् काव्ये दशावतारं वर्णनप्रसङ्गे भगवच्चेतनामपि प्रतिपादितम्। यदा संसारेऽस्मिन्अधर्मदुराचारं वर्द्धितितदाधर्मस्स स्थापनाय तथादुष्टानां विनाशाय श्रीजगन्नाथ: मीन-कूर्म-वराह-नृसिंह-वामन-परर्शुराम-राम-वलराम-बुद्ध-कल्किदशविधरूपं धारणंकरोति। अस्य प्रमाणं गीतायां भगवान्श्रीकृष्ण: स्वयं प्रददाति यथा-

"यदा यदाहि धर्मस्य ग्लानिर्भवतिभारत।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्।।[21]
परित्राणाय साधुनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे।।"[22]

भगवत: दशविधरूपस्य वर्णनंगीतगोविन्देभवति यथा-

"वेदानुद्धरते जगन्तिबहते भूगोलमुद्विभ्रते
दैत्यं दारयते वलिं छलयते क्षत्रक्षयं कुर्वते।
पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते
म्लेच्छान् मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नम:।।"[23]

कवि: प्रणतिपञ्चाशिकाकाव्ये संसाररुपकंदु:खकूपात् सकलजीवानां मुक्तये पुरुषोत्तमश्रीजगन्नाथस्य दशाविधरूपस्य स्तुतिं करोति।

**२.४.१मीनावतारस्वरूपम् :-**

दशावतारेषु प्रथममस्ति मीनावतारम्। सत्ययुगे परमेश्वर: महामीनरूपं धारणं कृतवान्।[24] अवतारेऽस्मिन् शङ्खासुरस्य विनाशं कृत्वा तस्य कवलात् सकलवेदस्य उद्धारं कृतवान्। तथैव श्रीजगन्नाथ: मानवस्य अज्ञानम् अपसारणं कृत्वा यथार्थज्ञानं प्रददाति। एतदस्ति श्रीजगन्नाथस्य भगवत्तत्त्वस्य उद्देश्यम्। काव्येऽस्मिन् प्रतिपाद्यते यथा-

"प्रचण्डवेगोच्छलिताम्बुराशि-
प्रभूतभङ्गोग्रसमग्रसिन्धौ।
प्रसिद्धवेदोद्धरणप्रवीण-
स्त्वमेव मीन: परिपाहि दीनम्।।"[25]

**२.४.२कूर्मरूपम् :-**

मीनावतारादनन्तरं कूर्मावतारस्य धारणं कृतवान् भगवान्। सत्ययुगे अमृतं प्राप्तये सागरस्य मन्थनं सुरासुरौ कृतवन्तौ। मन्थनकार्ये दण्डरूपेण व्यवहृत: सुमेरुपर्वतस्य विशालभारं भगवान् कूर्मावतारे[26] स्व पृष्ठदेशे धृत्वा मन्थनकार्यं संपूर्णयति। तथैव श्रीजगन्नाथ: संसारपरिपालनरुपकं भारात् मुक्तिं एवञ्च स्वकर्त्तव्यमुत्तमरूपेण संचालनाय शक्तिं प्रदानं करोति।। एतद् भवति भगवच्चेतनाया: अपरं वैशिष्ट्यम्। कवि: उदात्तकण्ठेन कूर्मस्वरूपस्य स्तुतिंकरोति यथा-

"कठोरपृष्ठभ्रमदद्रिदण्ड
प्रचूर्णितक्षीरपयोधिराज:।
सुरेषु दत्तामृतमोदधार-
स्त्वमेव कूर्म: परिपाहि तूर्णम्।।"[27]

**२.४.३वराहरूपम् :-**

दशावतारेषु तृतियमवतारमस्ति वराहावतारम्। सत्ययुगे भगवान् वराहावतारं धृतवान्।[28] एकदा दैत्यहिरणाक्ष: अतलसमुद्रगर्भे पृथिवीं वन्दिं कृतवान्। यद्वारा सकलजीव: त्राहिं त्राहिं करोति। तदा भगवान् शूकरूपं धृत्वा हिरण्याक्षं विनाशयति तथा धरणीमुद्धारयति। तथैव श्रीजगन्नाथ: दु:खपरिपूर्णं संसारसागरात् उद्धारं कृत्वा मुक्तिं प्रददाति। अस्मिन् प्रसंगे कवि: वर्ण्यते-

"पटिष्ठदंष्ट्राङ्कुरपृष्ठनिष्ठ-
क्षितीष्टभारं हृत दैत्यवीरम्।
विधातृनासापगतं विना त्वां
वदात्र कोलोद्धरणाय कोऽलम्।।"[29]

**२.४.४नृसिंहरूपम् :-**

भक्तप्रह्लादस्य रक्षणाय तथा च हिरण्यकशिपुदैत्यस्य विनाशाय भगवान् नृसिंहरूपं धारयति।[30] राक्षासकूले जात: प्रह्लाद: महान् बिष्णुभक्त: आसीत्। बिष्णुभक्त्या स्वजीवनं समर्पितवान्। स: प्रतिक्षणं हरिनामं जपयति। परन्तु तस्य पिता हिरण्यकशिपु: पुत्रस्य एतादृशं कार्यं विलोक्य क्रोधित: सन् तं मुहुर्मुहु: प्रताडितवान्। दुष्टानां विनाशाय तथा भक्तजनानां सुरक्षार्थं परमेश्वर: नरसिंहरूपं धृतवान्। तथैव श्रीजगन्नाथ: भक्तजनान् दुष्टेभ्य: रक्षति। कवि: काव्येस्मिन् वर्ण्यते यत्-

"अशीर्णभक्तिप्रियभृत्यनुत्या
विदीर्णदैत्याधिकीर्णवक्षा:।
त्वमद्धुत: स्तम्भभवो नृसिंहो
विदूरयेर्मे कलुषप्रसङ्गम्।।"[31]

**२.४.५वामनरूपम् :-**

दशावतारेषु पंचममवतारमस्ति वामनावतारम्।[32] एकदा सत्ययुगे राजावलि: पूण्यार्जनाय सर्वस्वं धनं ददाति स्म। क्रमश: तस्य मनसि अभिमानं जायते। वले: दानरूपकमम् अहंभावविनाशाय परमेश्वर: त्रिविक्रमावतारं धारयति। त्रिपादपरिमितं भूमिं दानरूपेण गृहित्वा एकपादेन समग्रपृथिवीं, द्वितीयपादेन अखिलब्रह्माण्डं च अधिकारं कृतवान्। तथा तृतीयपादेन भगवान् राजावलिं पातालल़ोकं प्रेषितवान्। तथैव श्रीजगन्नाथ: अस्माकंमनसि यत् अभिमानं जायते तद्विनाशं कृत्वा ज्ञानबुद्धिविवेकं प्रददाति। अत: कवि: उच्यते-

"द्विजस्वरूपच्छलितासुरेन्द्र-
त्रिविक्रमच्छादितलोकवृन्द:।
पदोदकै: पावितभूमिभाग-
स्त्वमेव खर्वो हर दैन्यपर्व।।"[33]

**२.४.६ पर्शुरामरूपम् :-**

भगवान् वामनावतारादनन्तरं पर्शुरामावतारं धारयति।[34] यदा धरापृष्टे क्षत्रियनृपेण प्रजा: शोषणमत्याचारिता: तदा भगवान् पर्शुराम: स्वपर्शुद्वारा एकविंशवारं पृथिवीं क्षत्रियशून्यं कृतवान्। तथैव श्रीजगन्नाथ: दुष्टानां विनाशंकृत्वा शिष्टान् रक्षयति तथा संसारे धर्मं स्थापयति। अत: काव्ये वर्ण्यते यत्-

"विपातितक्षत्रकुलास्त्रधार-
प्रशोधितक्षोणिगताघसार:।
सहस्त्रबाहु-क्षणदेशराहु-
स्त्वमेव भूत्यै भव भार्गवेन्द्र।।"[35]

**२.४.७ रामरूपम् :-**

त्रेतायुगे परमेश्वर: रामरूपं धृतवान्।[36] रामचन्द्रस्य वनवासकाले रावणेन छद्मेन माता-सीता अपहृता। पुनश्च दशाननरावणस्य अत्याचार: देवतामानवानां कृते असह्यमभवत् । पुरुषोत्तमश्रीरामचन्द्रेण दुराचारीलंकापति: हत:। तथैव श्रीजगन्नाथ: कलियुगे नारीणां स्वाभीमानं रक्षति एवं च रावण: इव अत्याचारीणां दुराचारीणां पापीनां विनाशयति। वर्ण्यते यत्-

"प्रतापाविध्वस्तदशास्यवाद:
मुनिभ्रमज्ञातकमोदनाब्द:।
नवाम्बुदश्यामलशोभनाङ्ग:
प्रपाहि राम त्वमुदारकाम:।।"[37]

**२.४.८ वलरामरूपम् :-**

द्वापरयुगे वलरामावतारं धृत: परमेश्वर: श्रीजगन्नाथ:।[38] धरापृष्टे कंसस्य दौरात्म्यं वर्द्धयति। तस्य अत्याचारेण जना: प्रपिडिता: सन् रक्ष: रक्ष: इति आर्त्तनादं कृतवन्त:। पृथिव्यां धर्मस्य संस्थापनाथाय वलरामेण हलायुधेन कंस: हत:। तथैव अस्मात् संसारात् अधर्मं विनाशयति पुरुषोत्तम: श्रीजगन्नाथ:। काव्येऽस्मिन् वर्ण्यते यत्-

"बलक्षकान्तिर्भुवनावलम्बौ
बलप्रभावक्षयितप्रलम्ब:।
बलारिवन्द्य: सकलाघदम्भं
बलाभिधानापहराविलम्बम्।।"[39]

**२.४.९ बुद्धरूपम् :-**

दशावतारेषु नवमम् अवतारमस्ति महात्मा बुद्ध:।[40] कलियुगे धरापृष्टे जीवहिंसां निवारणाय तथा पथभ्रष्टयुवकान् सुमार्गं प्रदर्शनाय सच्चिदन्द: परंब्रह्म बुद्धस्वरूपेण जन्मग्रहणम् अकरोत्। स: राजलक्ष्मी-स्त्रीपुत्र-धनसंपत्त्यादिं परित्येज्य वैराग्यं गृहीतवान्। सर्वेषु प्राणीषु अहिंसाभाव-पोषणमस्ति अस्य अवतारस्य उद्येश्यम्। तथैव दारुब्रह्म: श्रीजगन्नाथ: सर्वेषां कृते समभावं समानदृष्टिं च आचरति। अस्मिन् प्रसंगे कविना उच्यते-

"समानदृष्टिप्रसाप्रकाश:
समाधिबोधस्फुटजाड्यनाश:।
यथारुचि प्रेममयप्रसादं
तथागत त्वं भर निर्विषादम्।।"[41]

**२.४.१० कल्किरूपम् :-**

दशावतारेषु अन्तिमवतारमस्ति कल्कीस्वरूपम्। कलियुगान्ते अयम् अवतारं धारयिष्यति परमेश्वर:। यदा संसारे अधर्म-दुराचार-अनैतिकतादिं चरमसीमां लघंयिष्यति तदा श्रीजगन्नाथ: कल्कीरूपं धृत्वा धर्मस्य स्थापनं तथा च साधुनां रक्षां करिष्यति।

उच्यते यत्-

“सशाणखड्गोज्ज्वलघोरधार-
प्रसारणध्वस्तदुरात्मवार:।
असरभारादभिरक्ष कल्किन्
रसाविषादक्षयलक्ष्यकल्पिन्।।”[42]

## उपसंहार:

सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज इति गीतावचनानुसारं दारुब्रह्म पुरुषोत्तम: श्रीजगन्नाथ: मायापरिपूर्णजगत: पतितजनानां उद्धारयति इति न संशय:। अस्मिन् काव्ये कवि: मानवानां कृते स्वकर्त्तव्यं उत्तमरूपेण परिपालनाय निष्कामकर्म करणाय च उपदिशति। सांसारिकाणां मुमुक्षुकाणां च कृते वन्दनं स्तुति: वा परमपुरुषार्थप्राप्तये श्रेष्ठतमं मार्गम्। दु:खपूर्णसंसारात् मुक्तिं प्राप्तये मुहर्मुहु: हरिनाम स्मरणं कीर्त्तनं तथा तस्य पादसेवनं करणीयम्। भक्त: श्रीजगन्नाथस्य अनुग्रहाय स्वगृहं विहाय कर्मभूमिं गच्छति। कारणं स: जानाति श्रीपुरुषोत्तम: अरक्षरक्षणाय कलियुगेऽस्मिन् अवतरति। स: अखिलब्रह्माण्डस्य नाथ:। भगवच्चेतना प्रत्यकेषु पदार्थेषु अन्तर्भवति। सकलसृष्टि: तस्यैव सनातन अंशेभ्य: जायते। भगवान् नीलाद्रिनाथ: सकलशरीरं प्रतिवसति।

## सन्दर्भसूची –

1. ऋग् -१/१/५
2. तत्रैव-५/४५/९
3. शुक्लयर्जु- ४०/८
4. नियति कृत नियमरहितां ह्लादेकामयीमनन्य परतन्त्राम् । नवरसरूचिरां निर्मितिमादधति भारति कवेर्जयति।। -काव्यप्रकाश: १.१
5. तत्रैव-१.३
6. अग्नि.पु. ३३९.१०
7. सा.द., प्रथमपरिच्छेद: ।
8. रस.ग.-१/१
9. काव्यालंकार:-१/६
10. ऋग्.-१०/१२१
11. प्र.प- ध्यानश्लोकम्।
12. रवीन्दुनेत्राञ्चितकृष्णवक्त्र:।- तत्रैव-४२
13. ई.उ-शान्तिपाठ।
14. गोविन्दो वेदवेदान्तवन्द्यो भक्तिमितो विभु: । परमानन्दमात्रोऽसौ लीलामूर्त्तिनिरञ्जन:।।-शाण्डिल्य संहिता-३.१.२९
15. प्र.प. -६
16. तै.ति.उ-३.३.१
17. श्री.भा.पु-२.५.४०-४२
18. गीता-९.१७
19. प्र.प. -४५
20. तत्रैव -११
21. गीता-४/७
22. तत्रैव -४/८
23. गी.गो-१/४
24. तत्रैव -१.१.१
25. प्र.प.-१३
26. गी.गो.-१.१.२
27. प्र.प-१४
28. गी.गो.-१.१.३

29. प्र.प-१५
30. गी.गो.-१.१.४
31. प्र.प-१६
32. गी.गो.-१.१.५
33. प्र.प.-१७
34. गी.गो.-१.१.६
35. प्र.प.-१८
36. गी.गो.-१.१.७
37. प्र.प.-१९
38. गी.गो.-१.१.८
39. प्र.प.-२०
40. गी.गो.-१.१.९
41. प्र.प.-२१
42. तत्रैव- २२